No. ३८-ख

Title तर्कसङ्ग्रहः (दीपिकाटीका)

Author अन्नभट्टः

Extent २५ पत्र Age सं. १९३३

Subject न्यायशास्त्र

तर्कसंग्रह दीपिका सहित:

॥३७॥

निर्दोषपुरुष[illegible]शिष्टत्वं [illegible]शेषाभाविरहितत्वं च परनिष्ठोत्कर्षपूर्वकस्वनिष्ठापकर्षविधिक व्यापारः संयोगानुकूलो मनसो व्यापारो नमस्कारः ॥ निर्विघ्नसमाप्तिकामो मंगलमाचरेत भोजनस्य विगीतशिष्टाचार विषयत्वेऽप्यपि वेदबोधितकर्तव्यताकत्वं नास्तीत्यतो भवति व्यभिचारः नहि भोजनं कश्चिन्निषिद्धं मवाके शिष्टा नाचरन्तीति इति व्यभिचारवारणायालौकिकेति नत्वलौकिकं भोजनं किन्तु लौकिकं तत्फलस्य तृप्त्यादेरिहैवोपलंभात् न च भोजनस्यापि वेदविहितत्वं सायं प्रातर्मनुष्याणामशनं वेदनिर्मितमितिवचनादितिवाच्यं तस्यानुवादरूपात् नत्वनेन वाक्येन भोजनं विधीयते किन्तु रोगप्रोक्षमेवनियमार्थमनूद्यते ऽन्यथा वेदविहिततत्वे वेदविहितस्य प्रायश्चित्तश्राप्रि वत्कराचिदेहत्यादिना राज्यादेर्भोजनं कि रणे प्रायश्चित्तप्रातप्रसंगः स्यान्नत्वेवमस्ति ततो भोजनादेर्विहितत्वं तस्मान्न तत्र व्यभिचारः ॥ रात्रिश्राद्धादौ व्यभिचारवारणाय विगीतेति ॥ ननु मास्तु भोजने व्यभिचारः राज्याधिकरणकश्राद्धादौ तु भवेत्सः तस्यालौकिकत्वाद्वेदबोधितत्वं स्यान्नत्वस्ति तदतो व्यभिचार इति चेन्न तस्य विगीतत्वात् एवं चान्वयव्यतिरेकव्यभिचारो नास्ति श्राद्धं वेदविहितं परंतु राज्याधिकरणकं तन्निन्दितं

॥ग्रन्थेच्चि कीर्षितेग्रन्थविघ्नविघातभूतप्रतिमंगलकरोति॥ =३

गम्प्येतिर्यक्स्वनायाः प्रतिभाः तामिदं =१

निबन्धनस्यग्रन्थकौतोनिवेशयन्स्स न॥ =२

स.टी. १

हेतुसत्वे साध्याभाववत्वं व्यभिचारत्वं स दोषः। हेतुसत्वे साध्याभावाभाववत्वं सहचारत्वं स च निर्दोषः =५

॥ॐश्रीगणेशाय नमः ॥ॐ विश्वेश्वर साम्बमूर्तिं प्रणिपत्य गिरं गुरुं टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकां १ चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकमिष्टदेवतानमस्कारलक्षणं मंगलं शिष्यशिक्षार्थं निबध्नंश्चिकीर्षितं प्रतिजानीते ॥ निधायेति। ननु मंगलस्य समाप्तिसाधनत्वं नास्ति मंगले कृतेऽपि किरणावल्यादौ समाप्त्यदर्शनात् मंगलाऽभावेऽपि कादम्बर्यादौ समाप्तिदर्शनात् अन्वयव्यतिरेकव्यभिचारादिति चेन्न किरणावल्यादौ विघ्नबाहुल्यात् समाप्त्यभावः कादम्बर्यादौ ग्रन्थाद्बहिरेव मंगलं कृतमतो न व्यभिचारः ॥ ननु मंगलस्य कर्तव्यत्वे किं प्रमाणमिति चेन्न शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् तथाहि। मंगलं वेदबोधितकर्तव्यताकम् अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिश्राद्धवत् भोजनादौ व्यभिचारवारणायालौकिकेति रात्रिश्राद्धादौ व्यभिचारवारणायाविगीतेति शिष्टपदं स्पष्टार्थं नकुर्यान्निष्फलं कर्मेति जलताडनादेरपि निषिद्धत्वादिति ॥ तर्कसंग्रह इति ॥ तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः द्रव्यादिपदार्थास्तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियत इत्यर्थः। कस्मै प्रयोजनायेत्यत आह। सुखबोधायेति। सुखेनानायासेन बोधः पदार्थज्ञानं तस्मा इत्यर्थः ॥ ननु बहुषु तर्कग्रन्थेषु सत्सु किमर्थमपूर्वग्रन्थः क्रियत इत्यत आह। बालानामिति। तेषामतिविस्तरत्वात् बालानां बोधो न भवतीत्यर्थः। ग्रहणधारणापटुर्बालः न तु स्तनंधयः। किं कृत्वा क्रियत इत्यत आह। निधायेति। विश्वेश्वरं जगन्नियंतारं हृदि नितरां स्थापयित्वेत्यर्थः ॥१॥ नमः शिवाय शांता। श्री रामचन्द्राय नमः। श्री सहितकृष्णाय नमः। शुभमस्तु ॥ श्री ॥

ॐ निधाय हृदि विश्वेशं विधाय गुरुवंदनं बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥१॥ श्रीरामः ॥

गुरूणां विद्यागुरूणां वन्दनं नमस्कारं विधाय कृत्वेत्यर्थः ॥

॥ विपूर्वो धा करोत्यर्थे ऽभिपूर्वस्तु भाषणे मेलने चापि संपूर्वो निः पूर्वः स्थापने स्मृतः ॥ =२

ननु मंगलस्य शिष्टाचारविषयत्वमस्तु फलवत्त्वमाहत्य इत्याशंक्याह ॥ नकुर्यान्निष्फलं कर्मेति ॥ =६

ननु मंगले त्रिविधं। वस्तुनिर्देशात्मकं ॥ नमस्कारात्मकं आशीर्वादात्मकं ॥ वस्तुनिर्देशात्मकं कुमारसंभवे अस्त्युत्तरस्यां दिशि देवतात्मा। इत्यादिना ॥ नमस्कारात्मकमत्रैव। सूर्यशतके आशीर्वादात्मकं च ॥ =

अन्यतमत्वमिति ॥ सप्तत्वावच्छिन्नद्रव्यादिभेदनिष्ठप्रतियोगिताकात्यन्ताभाववत्त्वमित्यर्थः तेन द्रव्यादिसप्तकान्यतमत्वस्य प्रसिद्धा तदन्यान्यत्वरूपान्यतमत्वस्य प्रसिद्धावपि न क्षतिः ॥ द्रव्यगुणादि
भेदवदवत्वेऽपि स्वभेदवत्ताभावेन भेदसप्तकाभाववत्त्वमेवं गुणादेरपि बोध्यम् ॥ =४

मूले सप्तपदार्था इति ॥ द्रव्यादिरूपाणि सप्तैव पदार्थाः तदन्यतमत्वं वक्तुः पदार्था इत्यर्थः ... विशेषविषयत्वरूपम् एवमेव टीकायां ... पर्यवसानम् ॥ =६

पदार्थान् विभजते ॥ द्रव्येति ॥ पदस्य अर्थः पदार्थः इति व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्यलक्षणं ॥ ननु विभागादेव सप्तत्वे
लब्धे सप्तग्रहणं व्यर्थम् । इति चेन्न अधिकसंख्याव्यवच्छेदार्थत्वात् ननु ... पदार्थः । अभितो न वा नाद्यः अभित
स्य निषेधायोगात् नान्त्यः प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्या
प्यमिति व्यवच्छेदार्थत्वात् ॥ ननु सप्तान्यतमत्वं सप्तभिन्नभिन्नत्वमिति वक्तव्यं एवं च सप्तभिन्नस्याप्रसिद्धत्वात्
सप्तान्यतमत्वं कथमिति चेन्न द्रव्यादिसप्तान्यतमत्वं च द्रव्यादिभेदसप्तकाभाववत्त्वमिति तदर्थत्वात् एवम
ग्रेऽपि द्रष्टव्यम् ॥ द्रव्यं विभजते ॥ तत्रेति । तत्र द्रव्यादिमध्ये द्रव्याणि नवैवेत्यन्वयः कानि । तानि इत्यत आह ॥ पृ

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः ॥ तत्र द्रव्याणि । पृथिव्यप्तेजोवाय्वा
काशकालदिगात्ममनांसि नवैव ॥

सप्तपदार्था इत्यत्र वाक्ये पदार्थादि ... सप्तत्वं विधेयं ... त्यको भवति मानं तु अग्निहोत्रं जुहोतिय वागूं पचति ... नो द्रव्याग्निहोत्रं विधेयं ॥ ... विधेयं तदनन्तरं । इति कृत्वा

थिवीत्यादि ॥ ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्कथं नव द्रव्याणि तथाहि नीलं तमश्चलति इत्यबाधि
तप्रतीतिबलान्नीलरूपाधारतया क्रियाधारतया च द्रव्यत्वं तावत्सिद्धम् ॥ तत्र तमसो नाकाशादिपंचकेऽन्त
र्भावः रूपवत्त्वात् अत एव न वायौ स्पर्शाभावात् सदागतिमत्त्वाभावाच्च नापि तेजसि भास्वररूपाभावात् उ
ष्णस्पर्शाभावाच्च नापि जले शीतस्पर्शाभावात् नीलरूपाश्रयत्वाच्च नापि पृथिव्यां गंधाभावात् स्पर्शरहि
तत्वाच्च तस्मात्तमो दशमं द्रव्यमिति चेन्न तमसस्तेजोभावरूपत्वात् तथाहि तमो हि न रूपिवत् द्रव्यं आलो
कासहकृतचक्षुर्ग्राह्यत्वात् आलोकाभाववत् रूपि चाक्षुषप्रमायामालोकस्य कारणत्वात् तस्मात्तमो

ननु सप्तपदार्था इत्यत्र सप्तपदं संख्यावाचकं वर्तते कथं भवद्भिरुक्तं सप्तान्यतम
त्वपरं सप्तपदं । इत्याकांक्षायामाह ॥ ... सप्तान्यतम
त्वपरं ॥ यत्र सप्तपदं द्रव्यादिसप्तान्यतमप्रतीतौ ... सप्तपदं ...

लक्ष्यपदं विशेषणं तल्लक्ष्यतावच्छेदकं ॥ तद्व्याप्यत्वे सति तद्व्यापकत्वं समनियतत्वं।
जातिविशेषणलक्षणधर्मेऽसाधारणपंचैव धर्मपर्यायनामः। जातिश्चलक्षणे
पाधिप्रतीतौ निर्धर्मवदर्थौ ॥ =

तेजस्त्वावच्छिन्नाभावेत्यर्थः =१

2

ढ प्रकाशकं तेजः सामान्याभाववत्तमः तत्र नीलं तमश्चलतीति प्रत्ययो भ्रमः अतो न द्रव्याणीति सिद्धं ॥ द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणं लक्ष्यैकदेशावृत्तित्वमव्याप्तिः यथा गोः कपिलत्वं लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वमतिव्याप्तिः यथा गोः शृंगित्वं लक्ष्यमात्रावृत्तित्वमसंभवः यथा गोरेकशफवत्त्वं एतद्दूषणत्रयरहितो धर्मो लक्षणं स एवासाधारणधर्म इत्युच्यते लक्ष्यतावच्छेदकसमनियतत्वमसाधारणत्वं व्यावर्त्तकस्यैव लक्षणत्वे व्यावृत्तावभिधेयत्वादौ चातिव्याप्तिवारणाय तद्भिन्नत्वं धर्मविशेषणं देयं व्यवहारस्यापि लक्षणप्रयोजनत्वे न देयं व्यावृत्तेरपि व्यवहारसाधनत्वात् ननु गुणवत्त्वं न द्रव्यलक्षणं आद्यक्षणे उत्पन्ने विनष्टे द्रव्ये चाव्याप्तेरिति चेन्न ॥

॥ व्यावृत्तिर्व्येतरभेदः = लक्षणं व्यावृत्तिर्व्यवहारस्य साधनं इति वचनात् =

रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वगुरुत्वस्नेहशब्दबुद्धि
सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः ॥ उत्क्षेपणापक्षेपणाकुंचन
प्रसारणगमनानि पंचैव परमपरं चेति द्विविधं सामान्यं नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव ॥

एकाधिकरणसम्बन्धो सोदर =२

गुणसामानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात् नन्वेवमपि एकं रूपं रसात् पृथगिति व्यवहारात् रूपादवतिव्याप्तिरिति चेन्न एकार्थसमवायादेव तादृशव्यवहारोपपत्तौ गुणे गुणानङ्गीकारात् ॥ ॥ गुणं विभजते ॥ रूपेति ॥ द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः गुणत्वजातिमान्वा ॥ ननु लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात्कथं चतुर्विंशतिर्गुणा इति चेन्न लघुत्वस्य गुरुत्वाभावरूपत्वात् मृदुत्वकठिनत्वयोरवयवस्य संयोगविशेषरूपत्वात् ॥ कर्म विभजते ॥ उत्क्षेपणेति ॥ संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म कर्मत्वजातिमद्वा भ्रमणादीनामपि गमनेऽन्तर्भावान्न पंचत्वविरोधः ॥ सामान्यं विभजते ॥ परमिति ॥ परमधिकवृत्ति अपरं न्यूनवृत्ति सामान्यादि चतुष्टये जातिर्नास्ति ॥ विशेषं विभजते ॥ नित्येति ॥ पृथिव्यादि चतुष्टयस्य परमाणवो आ

ननु लघोः अभावे तरभावः कुतः इति कथन्नोक्तं कि
गुरुत्वस्य लघुत्वाभावरूपत्वात् ॥ उच्यते गुरुत्वस्या
पलापापत्ते छोटेमें बडा नहीं एवम् किंतु बडेमें छोटा देखते हैं॥

आद्यक्षणे द्रव्यं निर्गुणं निष्क्रियं चोत्पद्यते अन्यथा कारणत्वेन सा
तत्संभियतपूर्ववृत्तित्वघटितत्वात् ॥ =११ समवायिकारणसर्वगद्रव्य
अत्र गुणरूपकार्यं =
मेव इतिवचनात् ॥ =

प्राव: २

शरीरेन्द्रियभिन्नत्वे सति उपभोगसाधनं विषयः शरीरादावतिव्याप्तिवारणाय सत्यन्तं परमाण्वादावतिव्याप्तिवारणाय विशेष्यदलं कालादिवारणाय जन्यत्वे सति इत्यपि बोध्यम् ॥ =५
= शरीरेन्द्रियभिन्नउपभोगसाधनत्वे सति जन्यत्वं विषयत्वं =
= उपभोगसाधनमिति विशेष्यदलं =
= परमाणुउपभोगस्य प्रयोजकः =१
ननु आचार्येण उद्देशक्रमानुसारेण कथं प्रथमं पृथिव्या लक्षणं कृतं अपरत्वस्य लक्षणं कथं न कृतं इत्यत आह ॥ [illegible]

समवायस्य भेदो नास्तीत्याह ॥ समवायस्त्विति ॥ अभावं विभजते । प्रागभाव इति ॥ तत्रोद्देशक्रमानुसारात् प्रथमं पृथिव्या
लक्षणमाह ॥ गन्धवतीति ॥ नाममात्रेण वस्तुसंकीर्तनमुद्देशः उद्देशक्रमेव सर्वत्र हेतुः क्षियामिका ॥ ननु सुरभ्यसु
रभ्यवयवारब्धे द्रव्ये परस्परं विरोधेन गन्धानुत्पादनादव्याप्तिः न च तत्र गन्धप्रतीतेस्तत्रैवोत्पत्तिरिति वाच्यं अवय
वगन्धस्यैव प्रतीतिसंभवेन चित्रगंधानंगीकारात् ॥ किं चोत्पन्नविनिष्टघटादावव्याप्तिरितिचेन्न गन्धसमा
नाधिकरणद्रव्यत्वापरजातिमत्वस्य विवक्षितत्वात् ननु जलादावपि गन्धप्रतीतेरतिव्याप्तिरिति चेन्न अन्वय
व्यतिरेकाभ्यां पृथिवीगन्धस्यैव तत्र भानाङ्गीकारात् ननु तथापि कालस्य सर्वाधारतया सर्वेषां लक्षणानां कालेऽ
तिव्याप्तिरिति चेन्न सर्वाधारताप्रयोजकसंबंधभिन्नसंबंधेन लक्षणत्वस्य विवक्षितत्वात् ॥ पृथिवीं विभजते ॥

समवायस्त्वेक एव अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ॥
गन्धवती पृथिवी सा द्विविधा नित्याऽनित्या च नित्या परमाणुरूपाऽनित्या कार्यरूपा पुनस्त्रिवि
धा शरीरेन्द्रियविषयभेदात् शरीरमस्मदादीनां प्रत्यक्षसिद्धं पार्थिवं इन्द्रियं गन्धग्राहकं घ्राणं
नासाग्रवर्ती [illegible] विषयो मृत्पाषाणादिः ॥ छ ॥ छ ॥

सा द्विधेति ॥ नित्ये[illegible] ध्वंस[illegible] प्रतियोगित्वं नित्यत्वं ध्वंसप्रतियोगित्वमनित्यत्वं ॥ पुनस्तां विभजते ॥ पुनरिति ॥
आत्मनो भोगायतनं [illegible] यत्र किं नात्मनि भोगो जायते तद्भोगायतनं सुखदुःखान्यतरसाक्षात्कारो भोगः ॥ शब्
देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं इन्द्रियत्वं शरीरेन्द्रियभिन्नो विषयः ।
एवं च गन्धवच्छरीरं पार्थिवशरीरं ॥ गन्धवदिन्द्रियं पार्थिवेन्द्रियं गन्धवान्विषयः पार्थिवविषयः इति
पार्थिवलक्षणं बोध्यं ॥ पार्थिवशरीरं दर्शयति ॥ शरीरमिति ॥ पार्थिवमिन्द्रियं दर्शयति ॥ इन्द्रियमिति ॥
(पुनः प्रकारान्तरेण विभजते इति क्वचित्पुस्तके पाठः) (मूले) ॥ गन्धग्राहकमिति ॥ प्रयोजनकथनं ॥ घ्राणमिति सं
ज्ञा नासाग्रेत्याश्रयोक्तिः । एवमुत्तरोत्तरं ज्ञेयम् ॥ पार्थिवविषयं दर्शयति ॥ मृत्पाषाणेति ॥ ११ ॥

शब्देतरे ये उद्भूतविशेषगुणाः घट [illegible] तदनाश्रयत्वं ज्ञानस्य कारणीभूतो यो मनःसंयोगस्तदाश्रयत्वं च चतुरादावव्याप्तिः लक्षणसमन्वयः भवत्येवेन्द्रियमनःसंयोगो ज्ञानकारणं
आत्मा मनसा संयुज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षमिति नियमात् आत्मवारणाय सत्यन्तं कालवारणाय विशेष्यभागे अव्याप्तिवारणाय शब्देतरेति चतुरादौ तदारणाय
योद्भूतेति इन्द्रियार्थसंयोगाश्रयत्वस्य च तेषु रादेः सत्वाद्विशेष्य [illegible] घटध्वंसकारणीभूतः कालमनःसंयोगस्तदाश्रयत्वं काल इति [illegible]
= सपदनकालमनःसंयोग =१

[left margin notes]
[illegible] सुखदुःखसाक्षात्कारः ॥ =१
ये =
द्रव्योर्विरोधे गंधमपिन इति त्याद्यात गन्धाऽनुत्पादनं =३
संख्यादिपञ्चको गुणाः सामान्यसंज्ञकाः तद्भिन्नास्तु विशेषगुणाः =३
वि =१
उद्भूतत्वस्य प्रयोजकीभूतोऽपकर्ष उद्भूतत्वं =३
पर्यायत्वं ध्वंसेति । ध्वंसप्रतियोगित्वं ... कालमनःसंयोगः तदाश्रयत्वं ... घटध्वंसकारणं =२

[right margin notes]
मुनेः सम्मतत्वात् =१
चित्रगंधाङ्गीकारात् =३
न प्रतीत्युपपत्तिरिति वाच्यं नच अवयवगन्धस्यैव प्रतीतिसंभवेन चित्रगंधानंगीकारात् अवयवेषु समवायसंबंधेन गन्धवतीति अवयविनिष्ठा अत्र समवेतसंबंधेन गन्धवतीति एवरेन गंधः तत्र संबंधेन समुदायेन गन्धवतीति =४
पुनस्तां इत्यत्र पुनः प्रकारान्तरेण विभजते इति क्वचित् पुस्तके पाठः ॥ =१
यतर =२

3

॥ अथ जललक्षणमाह ॥ शीतेति ॥ [illegible] इत्यत्र विनष्टे जले । तिव्याप्तिवारणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वावरजातिमत्वं तात्पर्यं शीतं [illegible] तेजःसंबंधादेव शीतस्पर्शभानमिति नातिव्याप्तिः । अन्यत्सर्वं पूर्ववरीत्या व्याख्येयं ॥ तेजसो लक्षणमाह ॥ उष्णस्पर्शवदिति ॥ उष्णं जलमिति ॥ उष्णत्वप्रतीतेः तेजःसंबन्धानुविधायित्वान्नातिव्याप्तिः ॥ विषयं [illegible] जले [illegible] ॥ ननु सुवर्णं पार्थिवं पीतत्वाद्गुरुत्वाच्च हरिद्रावदिति चेन्न अत्यन्तानलसंयोगे सति [illegible] जलमध्यस्थघृते नाशादर्शनेऽपि सति प्रतिबंधके पार्थिवद्रवत्वनाश [illegible] भावावधारणात् सुवर्णस्यात्यन्तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधि[illegible] पपत्तेः तस्मात्पीतद्रव्यद्रवत्वनाशप्रतिबंधकतया द्रव्यान्तरसिद्धौ

शीतस्पर्शवि[illegible] वत्त [illegible] विधाः नित्यानित्याश्च नित्याः परमाणुरूपाः अनित्याः कार्यरूपाः पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात् शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति ॥ विषयः सरित्समुद्रादिः ॥ उष्णस्पर्शवत्तेजः । तद्द्विविधं ॥ नित्यमनित्यं च ॥ नित्यं परमाणुरूपमनित्यं कार्यरूपं । पुनस्त्रिविधं । शरीरेन्द्रियविषयभेदात् ॥ शरीरमादित्यलोके ॥ इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति ॥ विषयश्चतुर्विधः ॥ भौमदिव्योदर्याकरजभेदात् भौमं वह्न्यादिकं । अबिंधनं दिव्यं विद्युदादि । भुक्तान्नपरिणामहेतु रौदर्यं । आकरजं सुवर्णरूपवत्तया वाच्यादिषु अनन्तर्भावात्तेजस्त्वसिद्धिः ॥ अत्यंतानलसंयोगेऽनिमित्तकद्रवत्वाधिकरणपीतिमगुरुत्वाश्रयः स्वद्रवत्वनाशप्रतिबंधकविजातीयद्रव्यसंयुक्तो । त्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् जलमध्यस्थघृतादिवदिति तेन पार्थिवत्वानुपपत्तेस्तस्मात्पीतद्रव्यद्रवत्वनाशप्रतिबन्धकतया द्रव्यान्तरसिद्धौ नैमित्तिकद्रवत्वाधिकरणस्य तस्योष्णस्पर्शभास्वररू[illegible] पयोः रूपवष्टंभकपार्थिवरूपस्पर्शाभ्यां प्रतिबन्धादनुपलब्धिः तस्मात्सुवर्णं तैजसमिति ॥ ६ ॥ ॥ ॥

=विधानात्=

तेजःसंबंधअन्वयव्यतिरेकानुविधायित्वादित्यर्थः ॥=३

सुवर्णं न तैजसं गुरुत्वात् हरिद्रावदिति ।=४

उष्णस्पर्शवत् शरीरं तैजसशरीरं=

अनुवंधवैकल्यात् लक्षणाविधं ॥

शुष्कतर्कमधीयानः शृगालो जायते वने इति भारतर्के वाक्यं । इदं न कस्यापि पर्यायः अत्र स्मरणार्थं लिखितं ॥=

पार्थिवस्पर्शः अनुष्णाशीत ॥ =१

विधानात्=३

अनुच्छिद्येति । नाशाभावमानद्रवत्वाधिकरणत्वात्=२

भास्वरशुक्लरूपं तेजे ॥ चानण=२

तेजसंबंधि उष्णस्पर्शस्य उपष्टंभक पार्थिवसंबंधिरूपपीतरूपः । तेजसंबंधि भास्वरशुक्लरूपस्य उपष्टंभक पार्थिवसंबंधिस्पर्श । अनुष्णाशीतस्पर्शः । आभ्यां प्रतिबंधादनुपलब्धिः ॥=१

शिवः 3

युक्तियुक्तं वचो ग्राह्यं न ग्राह्यं गुरुगौरवात्
सर्वशास्त्ररहस्यं तेयाज्ञवल्केन भाषितं =

वायुं लक्षयति ॥ रूपरहितेति ॥ आकाशादावतिव्याप्तिवारणाय स्पर्शवानिति ॥ पृथिव्यादावतिव्याप्तिवारणाय रूपरहितेति ॥ ननु प्राणस्य कुत्रान्तर्भाव इत्यत आह ॥ शरीरेति ॥ सचेति । एक एव प्राणः स्थानभेदात्प्राणापानादिशब्दैर्व्यवह्रियत इति भावः ॥ स्पर्शानुमेयो वायुः तथाहि यो ऽयं वायौ वाति सति अनुष्णाशीतस्पर्शो भासते स स्पर्शः कचिदाश्रितः गुणत्वाद्रूपवत् न चास्य पृथिव्याश्रयः उद्भूतस्पर्शस्य पार्थिवस्योद्भूतरूपवत्त्वनियमात् ॥ न जलतेजसी अनुष्णाशीतत्वात् न विभुचतुष्टयं सर्वत्रोपलब्धिप्रसंगात् न मनः परमाणुस्पर्शस्यातीन्द्रियत्वात् तस्माद्यः प्रतीयमानस्पर्शाश्रयः स वायुः ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटवदिति चेन्न उद्भूतरूपवत्त्वस्योपाधित्वात् बहिर्द्रव्यत्वे सति इन्द्रियजन्यप्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति साध्यव्यापकत्वं पक्षे साधनाव्यापकत्वं न चैवं ॥ तद्वदात्मस्य तेजसोऽप्यप्रत्यक्षत्वापत्तिः इष्टत्वात्तस्माद्रूपरहितत्वाद्वायुरप्रत्यक्षः इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशक्रमः कथ्यते ईश्वरस्य चिकीर्षावशात्परमाणुषु क्रियाजायते ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते त्रिभिर्द्व्यणुकैः

रूपरहितः स्पर्शवान्वायुः स द्विविधः नित्योऽनित्यश्च ॥ नित्यः परमाणुरूपोऽनित्यः कार्यरूपः पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् शरीरं वायुलोके इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति विषयो वृक्षादिकंपनहेतुः शरीरान्तःसंचारी वायुः प्राणः स चैकोऽप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते ॥

एकैः [illegible] महापृथिवी महत्यापः महत्तेजो महान्वायुः उत्पद्यते एवमुत्पन्नस्य कार्यस्य [illegible] परमाणुद्वयविभागे सति द्व्यणुकविनाशः ततस्त्र्यणुकस्य ततश्चतुरणुकस्य एवं [illegible] परमाणवाम्लस्य समवायिकारणस्य नित्यत्वादसमवायिकारणनाशाद्द्व्यणुकनाशः [illegible] नाशात्त्र्यणुकनाश इति संप्रदायः सर्वत्रासमवायिकारणनाशाद्द्रव्यनाश इति नवीनाः परमाणुसद्भावे किं प्रमाणमुच्यते जालसूर्यमरीचिस्थं सूक्ष्मतमं रजो यदुपलभ्यते तत्सावयवं चाक्षुषद्रव्यत्वात् घटवत् त्र्यणुकावयवोऽपि सावयवः महदारंभकत्वात्तंतुवत् यो द्व्यणुकावयवः स एव परमाणुः स च नित्यः कार्यत्वेऽनवस्थाप्रसंगात् तथा च मेरुसर्षपयोरपि तुल्यपरिमाणत्वापत्तिः सृष्टिस्थितिप्रलये सद्भावे किं प्रमाणं धाता यथापूर्वमकल्पयत् इत्यादिश्रुतिरेव प्रमाणं सर्वकार्यद्रव्यध्वंसोऽवान्तर

तस्य परमाणोः कार्यत्वे सावयवत्वे ऽनवस्थाप्रसंगात्

पृथिवीघटपटादिकार्यद्रव्यः =

विभुचतुष्टयं तु आकाशकालदिगात्मा = ५

महत्त्वे सति उद्भूतरूपवत्त्वं चक्षुरिन्द्रियं प्रतिकारणं द्व्यणुकादावव्याप्तिवारणाय महत्त्वं पदं दत्तं ॥ वायुआत्मादावव्याप्तिवारणायोद्भूतपदं ॥ =

=प्रत्यक्षं प्रति =

अप्रत्यक्षमतीन्द्रियम् = साध्यव्यापकत्वे सति साधनाव्यापकत्वं उपाधित्वं = ६

[illegible]

^ मूलस्य पर्यायः ॥ अतीतेति ॥ स्य ॥

आकाशेऽति व्याप्तिवारणाय हेतुपदे नमित्तं हेतुर्विवक्षितः कंठाद्यभिघातेऽतिव्याप्तिवारणाय विभुत्वस्यापि निवेशः भूतलादिवारणाय ज्ञानेति कालादिवारणाय समवाये ति ॥ मूले ज्ञानाधिकरणेत्य स्य पर्यायः

वायेतिं आकाशादिवारणाय साधारणे त्यपि बोध्यम् ॥ मूले, प्राच्यादिव्यवहारेत्यस्य पर्यायः ॥

आकाशं लक्षयति ॥ शब्दगुणकमिति ॥ ननु आकाशमपि किं पृथिव्यादिवन्नानानेत्याह ॥ तच्चैकमिति ॥ भेदे प्रमाणाभावा-
दित्यर्थः ॥ एकत्वादेव सर्वत्र शब्दोपलब्धेः विभुत्वमित्याह ॥ विभ्विति । सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं किं नाम मूर्तत्वं
श्लो=३ परिच्छिन्नपरिमाणवत्वं क्रियावत्वं वा विभुत्वादेवात्मवत् नित्यत्वमित्याह ॥ नित्यं चेति ॥ कालं लक्षयति ॥ अती-
तेति ॥ सर्वाधारः कालः सर्वकार्यनिमित्तकारणं दिशो लक्षणमाह ॥ प्राचीति ॥ दिगपि कार्यमात्रे निमित्तका-
रणं ॥ आत्मनो लक्षणमाह ॥ ज्ञानेति । आत्मानं विभजते स द्विविधेति । परमात्मनो लक्षणमाह ॥ तत्रेति ॥
नित्यज्ञानाधिकरणत्वमीश्वरत्वं ॥ नन्वीश्वरस्य सत्त्वे किं प्रमाणं न तावत्प्रत्यक्षं तद्धि बाह्यमाभ्यंतरं वा नाद्यः अ-
रूपिद्रव्यत्वान्नान्त्य आत्मसुखा[illegible]कत्वान्नाप्यनुमानं लिंगाभावादिति चेन्न क्षित्यंकुरादिकं कर्तृजन्यं
कार्यत्वात् घटवदिति अनुमानस्य [illegible]माणत्वादुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वं कर्तृत्वमुपादानं
समवायिकारणं सकलपरमाण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वं यः सर्वज्ञः स सर्ववित् इत्यागमोऽपि तत्र प्रमाणं ॥
जीवस्य लक्षणमाह ॥ जीव इति ॥ सुखादिमत्त्वं जीवलक्षणं ॥ ननु मनुष्योऽहं ब्राह्मणोऽहमित्यादौ सर्वत्राहं प्रत्ययेशरी-
रस्यैव विषयत्वात् शरीरमात्मेति चेन्न शरीरस्य करपादादिनाशे शरीरनाशादात्मनोऽपि नाशप्रसंगात्

शब्दगुणमाकाशं तच्चैकं विभु नित्यं च अतीतादिव्यवहारहेतुः कालः स चैको नित्यो विभुः ॥ प्राच्यादिव्य-
वहारहेतुर्दिक् साप्येका नित्या विभ्वी च ज्ञानाधिकरणमात्मा स द्विविधः परमात्मा जीवात्मा
चेति ॥ तत्रेश्वरः सर्वज्ञः परमात्मा एक एव जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च सुखाद्युप-
लब्धिसाधनमिंद्रियं मनः तच्च प्रत्यात्मनियतत्वादनंतं ॥ परमाणुरूपं नित्यं ॥ ॥ ॥

नापीन्द्रियाणामात्मत्वं योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामीत्यनुसंधानाभावप्रसंगात् अन्यानुभूतेऽन्य-
स्यानुसंधानायोगात् अनुभवस्मरणयोः कार्यकारणभावस्य नियतत्वात्तस्माद्देहेन्द्रियव्यतिरिक्तो जीवः ॥
सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः स च न परमाणुः शरीरव्यापिसुखाद्यनुपलब्धिप्रसंगात् न मध्यमपरिमा-
णः ॥ मैं तथा सत्यनित्यत्वप्रसंगेन कृतनाशाकृताभ्यागमप्रसंगात् तस्मान्नित्यो विभुर्जीवः ॥ मनसो लक्षणमाह ॥ सुखेति ॥ स्पर्शर-
हितत्वे सति क्रियावत्वं मनसो लक्षणं ॥ मनो विभजते । तच्चेति ॥ एकैकस्यात्मन एकैकमनस्त्वात्मनामनेकत्वान्मनसोऽप्य-
नेकत्वमित्यर्थः ॥ परमाणुरूपमिति ॥ मध्यमपरिमाणवत्वे ऽनित्यत्वप्रसंगात् ॥ ननु मनो नाणु किंतु विभुः स्पर्शरहितद्रव्यत्वादा-
काशवदिति चेन्न । मनसो विभुत्वे आत्मनः संयोगस्यासमवायिकारणस्याभावाज्ज्ञानानुत्पत्तिप्रसंगात् न च विभुद्वयस्य संयोगो

रव्यापि =५

यदा जीवः परमाणुर्मन्यते तदा शरीरव्यापि सुखाद्यनुपलब्धिप्रसंगात् कथं । यदि शरीरावच्छिन्नपरमाणुत्वेन मान्यते जीव शरीरे ऽधिष्ठानं करोति तदा शरीरावच्छिन्न शरीरे सुखदुःखाद्युपलब्धिः न तु सर्व शरीरे सुखाद्युपलब्धिः ॥ लोके तु दृश्यते शरीरैकदेशे स्थित्वा सुखदुःखाद्युपलब्धेः सर्व शरीरे सुखदुःखादि संभवो जायते अतः जीवो न परमाणुः =५

कृतनाश अकृतअभ्यागम ॥ जिसने पुण्य क्रिया उसका तो देहवश ते नाश हो गया और जिसने अकृत नाम न किं क्रिया था उसको उस पुण्यवाले के मनुष्य का जो पुण्य का फल था प्राप्त हो गया ऐसा प्रसंग हो जावेगा ॥ =४

प्र॰ प॰
४

सर्वे विवादा लाघवे विश्राम्यन्ति । लाघवं हीश्वरमतं ॥ अयं नकस्यापि विषयः ॥ =

येनेन्द्रियेण यत्र गृह्यते तेनैवेन्द्रियेण तज्जातिस्तत्समवायस्तदभावश्च गृह्यते =१

नं=२

॥रूपं लक्षयति॥ चक्षुरिति॥ संख्यादावतिव्याप्तिवारणाय मात्रपदं रूपत्वेऽतिव्याप्तिवारणाय गुणपदं प्रभाभित्तिसंयोगेऽतिव्याप्तिवारणाय विशेषपदं देयम्॥ नन्वव्याप्यवृत्तिनीलादेः समुदाय एव चित्ररूपमिति चेन्न रूपस्याव्याप्यवृत्तित्वनियमात् ननु चित्रपटेऽवयवरूपस्यैव प्रतीतिरिति चेन्न रूपरहितत्वात्पटस्याप्रत्यक्षत्वप्रसंगात् न च रूपवत्समवेतत्वं प्रत्यक्षत्वप्रयोजकं गौरवात् तस्मात्पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धिः॥ रसं लक्षयति॥ रसनेति॥ रसत्वेऽतिव्याप्तिवारणाय गुणपदं॥ रसस्याश्रयमाह॥ पृथिवीति॥ आश्रयं विभज्य दर्शयति। पृथिव्यामिति॥ गन्धं लक्षयति॥ घ्राणेति॥ गन्धत्वेऽतिव्याप्तिवारणाय गुणपदं॥ स्पर्शं लक्षयति॥ त्वगिति॥ स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदं संयोगादावतिव्याप्तिवारणाय मात्रपदं॥ पाकजमिति॥ पाकस्तेजःसंयोगः

संयोगो द्विविधः॥ अभिघातो नोदनाख्यौ॥ तत्र शब्दजनकोऽभिघातः। तदन्यो नोदनः॥ =१

अथ गुणाः॥ चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं॥ पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधं॥ अभास्वरं शुक्लं जले भास्वरं शुक्लं तेजसि। रसनाग्राह्यो गुणो रसः। स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। पृथिव्यां षड्विधः। जले मधुर एव। घ्राणग्राह्यो गुणो गन्धः। स च द्विविधः। सुरभिरसुरभिश्च॥ पृथिवीमात्रवृत्तिः। त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः। शीतोष्णानुष्णाशीतभेदात्।

जलादौ =६ पृथिव्यप्तेजोवायुवृत्ति तत्र शीतो जले उष्णस्तेजसि अनुष्णाशीतः पृथिवीवाय्वोः। रूपादिचतुष्टयं पृथिव्यां पाकजमनित्[illegible]त्रापाकजं नित्यमनित्यं च॥ ६॥

तेन पूर्वरूपं नश्यति रूपान्तरमुत्पद्यत इत्यर्थः। अत्र परमाणुष्वेव पाकः न द्व्यणुकादौ आमपाकनिःक्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः तत्र परमाणवः समवायिकारणं तेजःसंयोगः असमवायिकारणं अदृष्टादिकं निमित्तकारणं द्व्यणुकादिरूपे कारणरूपमसमवायिकारणमिति पीलुपाकवादिनो वैशेषिकाः॥ पूर्वघटस्य नाशं विनैवावयविन्यवयवेषु परमाणुपर्यन्तेषु युगपद्रूपान्तरोत्पत्तिरिति पिठरपाकवादिनो नैयायिकाः अत एव पार्थिवपरमाणुरूपादिकमनित्यमि

परमाणु =२

परमाणुरूपं =३

तत्र कर्मजसंयोगो द्विविधः ॥ एकतरकर्मजसंयोगः ॥ उभयकर्मजसंयोगः
उभयकर्मजसंयोग मेषयोः संयोगः ॥ हस्तपुस्तकसंयोगः एकतरकर्मजसंयोगः = द्व
= द्वयोर्मध्ये एकः इति एकतरः ॥ =

५ 5

अपने अत्यंताभाव के समान होवे अधिकरण जिसका सो अव्याप्यवृत्ति होता है । अपना जो अत्यंताभाव उसका जो अधिकरण है ओ ही अधिकरण जिसका होवे सो अव्याप्यवृत्ति है सा कौन संयोग ॥ =१

अनित्यं = २

अयमेकः इमौ द्वौ इमे त्रयः इमे चत्वारः इत्यादि व्यवहारस्यासाधारणहेतुः

इदं महत् इदमणु इदं ह्रस्वमिदं दीर्घमित्याद्यात्मकस्यासाधारणहेतुः =

आद्यपतनासमवायिकारणं गुरुत्वं । प्रथमक्रियाभवति तदनंतरं विभागो जायते पुनः प्रथमदेशसंयोगध्वंसः तदनंतरं उत्तरदेशसंयोगः एतत्कालपर्यंतं आद्यपतनं तदनंतरं एवं रीत्या द्वितीयादि पतनबोधस्य ॥ परंतु द्वितीयादि पतनस्य वेगअसमवायिकारणम् =

नित्यगतमिति ॥ परमाणुगतमित्यर्थः ॥ अनित्यगतमिति ॥ द्व्यणुकादिनिष्ठमित्यर्थः । रूपादिचतुष्टयमुद्भूतं प्रत्यक्षं अनुद्भूतमप्रत्यक्षं उद्भूतत्वं प्रत्यक्षत्वप्रयोजको धर्मस्तदभावः अनुद्भूतत्वं संख्यां लक्षयति ॥ एकेति । परिमाणं लक्षयति ॥ मानेति । परिमाणं विभजते । तच्चेति ॥ भावप्रधानो निर्देशः अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः पृथक्त्वं लक्षयति । पृथगिति । इदमस्मात् पृथगिति व्यवहारकारणमित्यर्थः । संयोगं लक्षयति । संयुक्तेति । इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थः संख्यादिलक्षणेषु सर्वत्र दिक्कालादावतिव्याप्तिवारणाय साधारणेति देयं संयोगो द्विविधः कर्मजः संयोगजश्च आद्यः हस्तक्रियया पुस्तकसंयोगः द्वितीयो हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगः ॥ अव्याप्यवृत्तिः संयोगः (अव्याप्यवृत्तिः =) स्वात्यंताभावसमानाधिकरणत्वमव्याप्यवृत्तित्वं ॥ विभागं लक्षयति ॥ संयोगेति ॥
नित्यगतं नित्यमनित्यगतमनित्यं एकादिव्यवहारासाधारणहेतुः संख्या नवद्रव्यवृत्तिः । एकत्वादि परार्द्धपर्यंता एकत्वं नित्यगतं नित्यं अनित्यगतं द्वित्वादिकं सर्वगाप्यनित्यमेव मानव्यवहारासाधारणं कारणं परिमाणं नवद्रव्यवृत्तिः तच्चतुर्विधं अणु महद्दीर्घं ह्रस्वं चेति । पृथग्व्यवहारासाधारणं कारणं पृथक्त्वं सर्वद्रव्यवृत्तिः ॥ संयुक्तौ व्यवहारासाधारणहेतुः संयुक्त संयोगः सर्वद्रव्यवृत्तिः संयोगनाशको गुणो विभागः नवद्रव्यवृत्तिः परापरव्यवहारासाधारणे कारणे परत्वापरत्वे ते द्विविधे दिक्कृते कालकृते च दूरस्थे दिक्कृतं परत्वं समीपस्थे दिक्कृतमपरत्वं ज्येष्ठे कालकृतं परत्वं कनिष्ठे कालकृतमपरत्वं आद्यपतनासमवायिकारणं
गुरुत्वं पृथिवीजलवृत्तिः ॥ [illegible]
कालादावतिव्याप्तिवारणाय गुणइति ॥ रूपादावतिव्याप्तिवारणाय संयोगनाशक इति विभागोऽपि कर्मजो विभागजश्च आद्यो हस्तपुस्तकविभागो द्वितीयः कायपुस्तकवियोगः ॥ परत्वापरत्वयोर्लक्षणमाह ॥ परापरेति ॥ परव्यवहारकारणं परत्वमपरव्यवहारकारणमपरत्वमित्यर्थः । ते विभजते ॥ ते द्विविधे पुनः ॥ दिक्कृतयोरुदाहरणं दूरस्थ इति ॥ कालकृते उदाहरति ज्येष्ठ इति । गुरुत्वं लक्षयति ॥ आद्येति ॥ द्वितीयादिपतनस्य वेगासमवायिकारणत्वाद्वेगेऽतिव्याप्तिवारणाय आद्ये [illegible] ति ॥

बहुतरसूर्यक्रियाविशिष्टपिंडत्वं कालकृतपरत्वं अल्पतरसूर्यक्रियाविशिष्टपिंडत्वं कालकृतमपरत्वं बहुतरमूर्तद्रव्यसंयोगित्वं दिक्कृतपरत्वम् अल्पतरमूर्तद्रव्यसंयोगित्वं दिक्कृतमपरत्वं =

दंडादिवारणाय समवायी ॥ रूपादिवारणाय पतनेति । दंडादितु निमित्तकारणं ॥ रूपं च असमवायिकारणं न ॥ = द्व

शिवः
५

नैमित्तकं =२ चूर्णपदं सस्वप्रतिपत्त्यर्थं =३

द्रवत्वं लक्षयति ॥ स्यंदनेति ॥ स्यंदनं द्रवणं तेजः संयोगजं नैमित्तिकं तद्भिन्नं सांसिद्धिकं पृथिव्यां नैमित्तकमुदाहरति । घृ
तादाविति तेजसि तदाह सुवर्णादाविति । स्नेहं लक्षयति । चूर्णेति । कालादावतिव्याप्तिवारणाय गुण इति रूपादा
वतिव्याप्तिवारणाय पिंडीभावेति ॥ शब्दं लक्षयति ॥ श्रोत्रेति । शब्दत्वेऽतिव्याप्तिवारणाय गुणपदं रूपादा
वतिव्याप्तिवारणाय श्रोत्रेति । शब्दस्त्रिविधः । संयोगजो विभागजः शब्दजश्चेति ॥ तत्राद्यः भेरीदंडसंयोगज
न्यः द्वितीयो वंशे पाट्यमाने दलद्वयविभागजन्यश्चटचटकशब्दः ॥ भेर्यादिदेशमारभ्य श्रोत्रपर्यंतं द्वि
तीयादिशब्दाः शब्दजाः ॥ बुद्धेर्लक्षणमाह । बुद्धिरिति ॥ जानामीत्यनुव्यवसायगम्यं ज्ञानत्वमेव लक्षणमित्यर्थः
॥ बुद्धिं विभजते ॥ साचेति ॥ स्मृतेर्लक्षणमाह ॥ संस्कारेति । भावनाख्यः संस्कारः । संस्कारध्वंसेतिव्याप्तिवा

स्यंदनासमवायिकारणं द्रवत्वं पृथिव्यप्तेजोवृत्तिः तद्द्विविधं सांसिद्धिकं नैमित्तिकंच सांसिद्धि
कं जले नैमित्तकं पृथिवीतेजसो पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं तेजसि सुवर्णादौ चूर्णा
दि पिंडीभावहेतुर्गुणः स्नेहः जलमात्रवृत्तिः श्रोत्रग्राह्यो गुणः शब्दः आकाशमात्रः सद्वि
विधः ध्वन्यात्मको वर्णात्मकश्च ध्वन्यात्मको भेर्यादौ वर्णात्मक संस्कृत भाषादिरूपः सर्व
व्यवहारहेतुर्बुद्धिः साच द्विविधा । स्मृतिरनुभवश्च ॥ संस्कारजन्यं ज्ञानं स्मृतिः । तद्भिन्नं ज्ञानम
नुभवः । सद्विविधः । यथार्थो ऽयथार्थश्च ॥ तद्वति तत्प्रकारकानुभवो यथार्थः ॥ सैव प्रमेत्यु
च्यते तदभाववति तत्प्रकारकानुभवोऽयथार्थः ॥

रणाय ज्ञानमिति । घटादि प्रत्यक्षेति व्याप्तिवारणाय संस्कारजन्यमिति । प्रत्यभिज्ञायामतिव्याप्तिवारणाय मा
त्रेति । अनुभवं लक्षयति । तद्भिन्नमिति । स्मृतिभिन्नं ज्ञानमनुभव इत्यर्थः । अनुभवं विभजते । स द्विविध इति ॥ यथार्था
नुभवलक्षणमाह ॥ तद्वतीति ॥ ननु घटे घटत्वमिति प्रमायामव्याप्तिः घटत्वे घटाभावादिति चेन्न यत्र यत्संबन्धो ऽ
स्ति तत्र तत्संबन्धानुभव इत्यर्थात् घटत्वेऽपि घटसंबन्धोऽस्तीति नाव्याप्तिः ॥ सैवेति । यथार्थानुभव एव शास्त्रे प्रमे
त्युच्यत इत्यर्थः ॥ अयथार्थं लक्षयति । तदभाववतीति । नन्विदं संयोगीति प्रमायामतिव्याप्तिरिति चेन्न येनावच्छेदेन
यत्संबंधाभावस्तदवच्छेदेन तत्संबंधज्ञानस्य विवक्षितत्वात् संयोगाभावावच्छेदेन ज्ञानस्य संयोगभ्रमत्वात् संयोगा

स्मृतिवारणाया नुभवेति अयथार्दे =१ र्थानुभववारणाय तद्वतीति निर्विकल्पेऽतिव्याप्तिवारणाय तत्प्रकारइति ज्ञानस्मृतिवारणायानुभवइति यथार्थानुभवनिरासाय तदभाववतीति
निर्विकल्पखण्डनाय तत्प्रकार इति अयुक्तम् ... इत्यस्यार्थानुभवः अयथार्थः ... इतियथार्थानुभवसंग्रहः
... इत्यत घटत्वमें घट है एसी जो प्रमा है ... ऐसा चाहिये ॥ सो घटमें घटत्व होता है । और घटत्वमें घट नहिं होता इति प्रकटार्थः =४

सदतीति ॥ घटत्ववति घटे घटत्वप्रकारकानुभवो यथार्थानुभवः ॥ =१३

तदभाववतीति ॥ रजतत्वाऽभाववति शुक्तौ रजतत्वप्रकारकानुभवोऽयथार्थानुभवः = १४

ननु घटे घटेति ॥ घटनिष्ठाधारतानिरूपिताधेयताशालि घटत्वम् इति तु समीचीनं ॥ घटत्वनिष्ठाधारतानिरूपिताधेयताशालि घटः इति तु न संभवति । ... तु न संभवति तस्यां प्रमायां अव्याप्तिः कुतः नैयायिकमते सप्तम्यन्तं विशेषणं प्रथमान्तं विशेष्यं इति व्यवहारोस्ति ॥ विशेष्यमें विशेषण रहता है और विशेषण आधेय ॥ इहां घटत्व ... सप्तम्यन्ते चे ...

अ सन्निकर्ष =

इन्द्रियार्थजन्यं ज्ञानम् अनुभवः तदुभयभिन्नं ज्ञानं प्रत्यभिज्ञा =१२

इन्द्रियं चक्षुरादि अर्थो घटपटादि

सप्तम्यर्थस्तृतीया =२

यथार्थानुभवं विभजते ॥ यथार्थेति ॥ प्रसंगात्प्रमाकरणं विभजते ॥ तत्करणमिति ॥ प्रमाकरणं प्रमाणमिति प्रमाणसामान्यल
क्षणं ॥ करणलक्षणमाह ॥ असाधारणेति ॥ साधारणकारणे दिक्कालादावतिव्याप्तिवारणाय असाधारणेति ॥ कारणलक्षण
माह ॥ कार्येति । पूर्ववृत्तिकारणमित्युक्ते रासभादावतिव्याप्तिः स्यादतो नियतेति तावन्मात्रे कृते कार्येतिव्याप्तिरतः
६ पूर्ववृत्तीति ॥ ननु तंतुरूपमपि पटं प्रति कारणं स्यादिति चेन्न अनन्यथासिद्धत्वे सतीति विशेषणात् अनन्यथासिद्धत्व
मन्यथासिद्धिविरहः अन्यथासिद्धश्च त्रिविधः येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धं
यथा तंतुना तंतुरूपं तंतुत्वं च पटं प्रति अन्यं प्रति पूर्ववृत्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्य
6 थासिद्धं यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञाते एव पटं प्रति आकाशस्यान्यगर्क्तृप्तनियतपूर्ववर्त्तिन एव कार्यसम्भवे तत्स स्वीकृत = 6

यथार्थानुभवश्चतुर्विधः ॥ प्रत्यक्षानुमिति । उपमिति शाब्दभेदात् तत्करणमपि चतुर्विधं प्रत्यक्षानुमानो
पमानशाब्दभेदात् ॥ असाधारणं कारणं करणं कार्यनियतपूर्ववृत्ति कारणं कार्यं प्रागभावप्रतियोगि ॥
कार्येणकारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति तन्तुवेमादिसंयोगभिन्नत्वे सति आत्मविशेषगुणभिन्नत्वे सति यत्कारणं तदसमवायिकारणम् ॥---------
कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं यथा
तन्तवः पटस्य पटश्च स्वगतरूपादेः कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदस अर्थे नामप्रधिकरणे = ४
मवायिकारणं यथा तंतुसंयोगः पटस्य तन्तुरूपं पटरूपस्य ॥ ६ ॥ ६ ॥ ॥ ॥ ॥
=आमपाकनिवृत्तगन्धादेः गंधस्य=
सहकारी = १ = हृभूतमन्यथासिद्धं यथा पाकजस्थले गंधं प्रति रूपप्रागभावस्य एवं चानन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वं ॥
कार्यलक्षणमाह ॥ कार्यमिति ॥ कारणं विभजते ॥ कारणमिति ॥ समवायिकारणलक्षणमाह ॥ यत्समवेतमिति ॥
यस्मिन्समवेतमित्यर्थः ॥ असमवायिकारणं लक्षयति ॥ कार्येणेति ॥ कार्येणेत्येतदुदाहरति ॥ तंतुसंयोग इति ॥
कार्येण पटेनैकस्मिन्तन्तौ समवेतत्वात् तंतुसंयोगः पटस्यासमवायिकारणमित्यर्थः कारणेन सहेति तदुदाहरति ॥
तन्तुरूपमिति ॥ कारणेन पटेन सहैकस्मिन्तन्तौ समवेतत्वात् तन्तुरूपं पटरूपस्यासमवायिकारणमित्यर्थः ॥ ६ ॥

प्रमाकरणमिति ॥ प्रमाणमित्यत्र प्रमीयतेऽनेनेति व्युत्पत्त्या प्रमाणशब्देन प्रमाकरणं लभ्यते प्रमाकरणं लक्षणं लक्षणतावच्छेदकं प्रमाकरणत्वं इतरभेदानुमाने तदेव पक्षतावच्छेदकं प्रमाकरणत्वं
लक्षणं इतरभेदानुमाने हेतुः तथा चायं प्रयोगः प्रमाकरणं इतरेभ्यो भिद्यते प्रमाकरणत्वादिति अत्रान्वयसहचारव्यतिरेकसहचाराज्ञान्वयव्याप्तिरेव गृह्यते इत्याचार्यमते प्रमाकरणत्वमितरभेदसामानाधिकरणमिति ॥ व्याप्तिनिश्चयस्तु लक्षितवित्तिविषयतया इतरभेदं प्रमाकरणत्वसमानाधिकरण इत्येवं विधसाध्यनिश्चयरूपतया प्रमाकरणमितरभिन्नमित्यनुमिति प्रतिबंधकसिद्धि ६
रूपत्वात् सिद्धसाधनमिति भावः ॥ नै शमाघन्तरेकथ्याशेवगहीतया ॥ = ७

समवायिअसमवायिभ्यां भिन्नं यत्कारणं तन्निमित्तकारणं इत्यर्थः अत्र हि घटरूपकार्यस्य कपालद्वयं समवायिकारणं कपालद्वयसंयोगः असमवायिकारणं। कपालद्वययोः संयोगः आभ्यां भिन्नं तंतुवेमादि सं ते घटरूपकार्यस्य निमित्तकारणं भवति॥ लोके तु दृश्यते घटरूपकार्यस्य दंडचक्रादिकं निमित्तकारणं॥ तै इत्यस्य तया स्ति वार

लक्षणं धर्मपरस्यापनीयः कथं। समवायिकारणताऽसमवायिकारणताभ्यां भिन्ना याकारणता सा निमित्तकारणता इति लक्षणं समीचीनं इति कृत्वा स्वरकार्यस्य स्वर निमित्तकारणताऽऽयाति न कुत्रापि दोषः॥ =१

निमित्तकारणं लक्षयति॥ तदुभयेति॥ समवाय्यसमवायिभिन्नं कारणं निमित्तकारणमित्यर्थः॥ कर्तौ रणलक्षणमुपसंहरति॥ तदेतदिति॥ प्रत्यक्षलक्षणमाह॥ तत्रेति॥ मे प्रमाणचतुष्टयमध्ये इत्यर्थः॥ प्रत्यक्षज्ञानस्य लक्षणमाह॥ इन्द्रियेति॥ इन्द्रियचक्षुरादिकमर्थो घटपटादिस्तयोः सन्निकर्षः संयोगादिस्तज्जन्यं ज्ञानमित्यर्थः। तद्विभजते॥ तद्द्विविधमिति॥ निर्विकल्पस्य लक्षणमाह॥ निष्प्रकारकमिति विशेषणविशेष्यसंबंधानवगाहि ज्ञानमित्यर्थः॥ ननु निर्विकल्पके किं प्रमाणमिति चेन्न गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दण्डीति ज्ञानवदित्यनुमानस्य प्रमाणत्वात् विशेषणज्ञानस्यापि सविकल्पकत्वेनवस्थाप्रसंगात् निर्विकल्पकसिद्धिः॥ सविकल्पकं लक्षयति॥ सप्रकारकमिति॥

॥ॐ॥ ५

तदुभयभिन्नं कारणं निमित्तकारणं॥ यथा तुरीवेमादिकं पटस्य तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणं तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षमिंद्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं। तद्द्विविधम्॥ निर्विकल्पकं सविकल्पकं च तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकं। सप्रकारकं ज्ञानं सविकल्पकं॥ यथा डित्थोयं ब्राह्मणोयमिति प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षः षड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणं विशेष्यभावश्चेति॥ चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः॥ घटरूपप्रत्यक्षजनने संयुक्तसमवायसन्निकर्षः। चक्षुसंयुक्ते

[illegible]

नामजात्यादिविशेषणविशेष्यसंबंधावगाहि ज्ञानमित्यर्थः॥ सविकल्पकमुदाहरति॥ यथेति। इन्द्रियार्थसन्निकर्षं विभजते। प्रत्यक्षेति॥ संयोगसन्निकर्षमुदाहरति॥ चक्षुषेति॥ द्रव्यप्रत्यक्षे सर्वत्र संयोगसन्निकर्ष इत्यर्थः। आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेन ततः प्रत्यक्षज्ञानमुत्पद्यते॥ संयुक्तसमवायमुदाहरति॥ घटरूपेति। तत्र युक्तिमाह॥ चक्षुःसंयुक्त इति॥ संयुक्तसमवेतसमवायमुदाहरति॥

निर्गुणत्वेक्रियागुणाइति गुणानांगमनासंभवात् श्रोत्रस्याशब्दरूपत्वेन विभुत्वाद्गमनासंभवादिति भावः =१

एतेन १ विशेषणविशेष्यभावसन्निकर्षेणाभावप्रत्यक्षोपपादनेन = ४ =

करणेति ।

॥ ॐ ॥

रूपत्वेति ॥ समवायमुदाहरति ॥ श्रोत्रेणेति ॥ तदुपपादयति ॥ ~~कर्णेति~~ । ननु दूरस्थशब्दस्य कथं श्रोत्रसंबंध इति चेन्न ॥ वीचीतरंगन्यायेन कदंबमुकुलन्यायेन वा शब्दान्तरोत्पत्तिक्रमेण श्रोत्रदेशजातस्य श्रोत्रसंबंधात्तस्य तत्त्वसंभवात् ॥ समवेतसमवायमुदाहरति ॥ शब्दत्वमिति ॥ विशेषणविशेष्यभावमुदाहरति ॥ अभावेति ॥ तदुपपादयति ॥ घटाभाववदिति ॥ भूतले घटो नास्तीत्यत्राभावस्य विशेष्यत्वं द्रष्टव्यं एतेनानुपलब्धेः प्रमाणत्वं निरस्तं यद्यत्र घटोऽभविष्यत्तदा भूतलमिवाद्रक्ष्यत् दर्शनाभावान्नास्तीति तर्कितप्रतियोगिसत्त्वविरोध्यनुपलब्धिसहकृतेन्द्रियेणैवाभावज्ञानोपपत्तौ अनुपलब्धेः प्रमाणान्तरत्वासंभवात् अधिकरणज्ञानार्थमपेक्षणीयेन्द्रियस्यैव करणत्वोपपत्तौ अनुपलब्धेः करणत्वस्यायुक्तत्वात् विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमेव नातिरिक्तः संबंधः ॥ प्रत्यक्ष

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायसन्निकर्षः चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् श्रोत्रेण शब्दसाक्षात्कारे समवायसन्निकर्षः कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् शब्दत्वसाक्षात्कारे समवेतसमवायसन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् अभावप्रत्यक्षे विशेषणविशेष्यभावसन्निकर्षः घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धं ॥ अनुमितिकरणमनुमानं परामर्शजन्यं ज्ञानमनुमितिः ॥ ॥ ॥ ॥

ज्ञानमुपसंहरन् तस्य करणमाह ॥ एवमिति ॥ असाधारणकारणत्वादिन्द्रियमेव प्रत्यक्षज्ञानकरणमित्यर्थः ॥ प्रत्यक्षमुपसंहरति ॥ तस्मादिति ॥ अनुमानं लक्षयति । अनुमितिकरणमिति ॥ अनुमितेर्लक्षणमाह ॥ परामर्शेति ॥ ननु संशयोत्तरप्रत्यक्षेऽतिव्याप्तिः स्थाणुपुरुषसंशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति परामर्शे सति पुरुष एवेति प्रत्यक्षजननाच्च तत्रानुमितिरेवेति वाच्यं पुरुषं साक्षात्करोमीत्यनुव्यवसायविरोधात् इति चेन्न पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात्सिसाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता साध्यसिद्धिरनुमितिप्रतिबंधिका सिद्धिसत्त्वेप्यनुमितीच्छायामनुमितिदर्शनात्सिसाधयिषोत्तेजिका तत उत्तेजकाभावविशिष्टमण्यभावस्य दाहकारप्रतिबंधकेसतिकार्यजनकत्वं उत्तेजकत्वम् ॥ =१

प्रम = ४

विषयीभूत = ५

तस्मादिन्द्रियं = ५

व्याप्यो नाम व्याप्याश्रयः अत्र व्याप्तिः पुरुषत्व पुरुष के व्याप्य हस्तादिक तांके करादि व्याप्य = ३

शिवः

निरूपितेति पर्वत कहता है कि धूम मेरे में रहता है =

व्याप्यो नाम व्याप्त्याश्रयः स च धूमादिः तस्य पर्वतादिनिरूपितवृत्तित्वं पक्षधर्मतेत्यर्थः = ४

प्रकटी भाव

परामर्शं लक्षयति ॥ व्याप्तीति ॥ व्याप्तिविषयकं यत्पक्षधर्मताज्ञानं स परामर्श इत्यर्थः परामर्शमभिनीय दर्शयति । यथेति ॥
अनुमितिमभिनयति ॥ तज्जन्यमिति ॥ परामर्शजन्यमित्यर्थः ॥ व्याप्तेर्लक्षणमाह ॥ यत्रेति ॥ यत्र धूमस्तत्राग्निरिति व्याप्तेरभिन प्रकटी भावः = २
(लक्षण मर्यादा) यः साहचर्यनियम इति लक्षणं साहचर्यं सामानाधिकरण्यं तस्य नियमः हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगि
साध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः ॥ पक्षधर्मतास्वरूपमाह ॥ व्याप्यस्येति ॥ अनुमानं विभजते । अनुमानमि
ति । स्वार्थानुमितिं दर्शयति ॥ स्वयमेवेति ॥ भूयो दर्शनेनेति ॥ ननु पार्थिवत्व लोहलेख्यत्वादौ सतशः सहचारद

धूमाग्न्योर्व्याप्तिग्रहे साध्यसाधनयोः भूयः सहचारदर्शनेनेत्यर्थः = ५

व्यापक / व्याप्य

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः ।
तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः
व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ॥ अनुमानं द्विविधं । स्वार्थं परार्थं च । स्वार्थं स्वार्थानुमिति
हेतुः तथा हि स्वयमेव भूयो दर्शनेन ॥ यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा आदिपदेन गोष्ठ चत्वर देवत्वनादि = ४
धू = ५ पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति
तदनंतरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते ऽयमेव लिंगपरामर्श इत्युच्यते तस्मात्प
र्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानं ॥ ६ ॥ ६ ॥ ६ ॥

र्शनेऽपि हीरके व्यभिचारोपलब्धेः भूयो दर्शनेन कथं व्याप्तिग्रह इति चेन्न व्यभिचारज्ञानविरहसहकृतसहचा
रज्ञानस्य व्याप्तिग्राहकत्वात् व्यभिचारज्ञानं निश्चयः शंका चा तद्विरहः क्वचित्तर्कात् क्वचित्स्वतः सिद्ध एव धू
माग्निव्याप्तिग्रहे कार्यकारणभावभंगप्रसंगलक्षणस्तर्को व्यभिचारशंकानिवर्तकः ननु सकलवह्निधूमयोरसन्निकर्षात्क
थं व्याप्तिग्रह इति चेन्न धूमत्ववह्नित्वरूपसामान्यप्रत्यासत्त्या सकलधूमवह्निज्ञानसंभवात् तस्मादिति लिंगपरामर्श

८

परार्थानुमानमाह॥यत्त्विति॥यत्तु कस्यतत्परार्थानुमानमिति तत्तुवेनान्वयः पंचावयववाक्यमुदाहरति॥यथेति॥अवयवस्वरूपमा
ह॥प्रतिज्ञेति॥उदाहृतवाक्येप्रतिज्ञादिशेषमाह॥पर्वतोवह्निमानिति॥साध्यवत्तयापक्षवचनंप्रतिज्ञा पंचम्यंतंतृतीयांतंवालिं
गप्रतिपादकंहेतुः॥व्याप्तिप्रतिपादकमुदाहरणं पक्षधर्मताज्ञानार्थमुपनयः॥हेतु॥साध्यवत्तयापक्षप्रतिपादकंवचनंनिगमनं प
क्षज्ञानंप्रतिज्ञाप्रयोजनं लिंगज्ञानंहेतुःप्रयोजनं।व्याप्तिज्ञानमुदाहरणप्रयोजनं।पक्षधर्मताज्ञानमुपनयप्रयोजनं।अबा
धितत्वादिकं निगमनप्रयोजनं।अनुमितिकरणमाह।स्वार्थेति॥ननुव्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेवानुमितिसंभ
वे व्याप्तिविशिष्टपरामर्शः किमर्थमंगीकर्तव्य इति चेन्न वह्निव्याप्यवानयमिति शाब्दपरामर्शस्थले परामर्शस्यावश्यतया

यत्तु स्वयंधूमादग्निमनुमाय परंबोधयितुंपंचावयववाक्यं प्रयुज्यते तत्परार्थानुमानं यथापर्वतोऽग्नि
मान्धूमवत्त्वात् योयोधूमवान् सोऽग्निमान् यथामहानसः तथाचायंतस्मात्तथेति
अनेन प्रतिपादितात्लिंगात्परोप्यग्निंप्रतिपद्यते प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पंचावयवाः प
र्वतोग्निमानिति प्रतिज्ञा धूमवत्त्वादितिहेतुः योयोधूमवान्सः सोऽग्निमानित्युदाहरणं तथाचायमित्युपन
यः तस्मात्तथेति निगमनं स्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्शएककरणं तस्माल्लिंगपरामर्शोऽनुमानं
लिंगंत्रिविधं॥अन्वयव्यतिरेकी केवलान्वयी केवलव्यतिरेकी चेति॥अन्वयेनव्यतिरेकेण व्याप्तिमत्तदन्वयव्यति
रेकि यथावह्नौसाध्ये धूमवत्त्वं यत्रधूमस्तत्राग्निरित्यन्वयव्याप्तिः यत्रवह्निर्नास्ति तत्रधूमोपिनास्ति यथाम
हाहृदः इतिव्यतिरेकव्याप्तिः अन्वयमात्रव्याप्तिकं केवलान्वयी यथाघटोऽभिधेयः प्रमेयत्वात् इति पटव
त् अत्रप्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्यप्रमेयत्वादभिधेयत्वाच्च ॥ ८ ॥ श्रीरामः॥

तो=४

लाघवेनसर्वत्रपरामर्शस्यैव करणत्वात् लिंगंनकरणमतीतादौव्यभिचारात् व्यापारवत्कारणंकरणमितिमतेपराम
र्शद्वाराव्याप्तिज्ञानंकरणं तज्जन्यत्वेसति तज्जन्यजनकोव्यापारः॥अनुमानमुपसंहरति॥तस्मादिति॥लिंगंविभजते॥लिं
गमिति॥अन्वयव्यतिरेकिलक्षयति।अन्वयमिति॥हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः तदभावयोर्व्याप्तिः व्यतिरेकव्या
प्तिः॥केवलान्वयिनोलक्षणमाह॥अन्वयेति॥केवलान्वयिसाध्यकं केवलान्वयि अत्यन्ताभावाप्रतियोगित्वं केवलान्वयि
केवलान्वयिहे साध्यजिसकासकेवलान्वयि=१

त्वं॥केवलान्वयिनमुदाहरति॥घटोऽभिधेयः प्रमेयत्वादिति॥
ईश्वरप्रमाविषयत्वं सर्वं यद्वा अभिधेयत्वं च सर्वगा नास्तिव्यतिरेका॥
॥ भावः ॥

प्राव:
८

ध्वंसाभावो विनाशी जन्यत्वात् ॥ इत्यत्र भावत्वमुपाधिः स चेत्केवलसाध्यव्यापकोन ॥ कथं ॥ यत्र २ विनाशित्वं तत्र २ भावत्वं । विनाशित्वं कुत्र प्रागभावे घटे तत्र भावत्वमपि ॥ पुनः विनाशित्वं प्रागभावे तत्र विनाशित्वे भावत्वं नास्ति उत्पत्तेरभावात् अतः उपाधिः केवलसाध्यव्यापको किंतु जन्यत्वावच्छिन्नविनाशित्वं यत्र तत्र भावत्वं ॥ अतः जन्यत्वावच्छिन्नविनाशित्वं प्रागभावे नास्ति ॥ अतः असदनुमानं । अत्र जन्यत्वावच्छिन्नभावत्वमुपाधिः ॥ अयं पर्यायः अधोटीकायाः २ पंक्तिः ॥ =

पक्षात् दृष्टांतः सर्वत्र पृथक् भवति अत्र सर्वस्यापि पक्षत्वात् पृथक् हे दृष्टांतो न सर्वे पदार्थाः पक्षस्यांतर्गतत्वात् = मूलस्य ३ पंक्तिः ॥

प्रागभावो विनाशी प्रमेयत्वात् इत्यत्रापि भावत्वमुपाधिः ॥ स च साध्यव्यापकोन कथं ॥ यत्र २ विनाशित्वं तत्र २ भावत्वं यथा घटः । पुनः विनाशित्वं प्रागभावे तत्र भावत्वं न । अतः उपाधिः केवलसाध्यव्यापको नास्ति । अतः उदासीनधर्मावच्छिन्नहे साध्यव्यापको पाधिरत्र ॥ अत्रो दासीन पदं जन्यत्वं कथं अत्र जन्यत्व पदं पक्षोपि न साध्योपि न साधनोपि न अतः उदासीनत्वं पुनः यत्र जन्यत्व पदं पक्षो भवति तदा पक्षधर्मावच्छिन्नेति वक्तुं योग्यः एवं साध्यसाधनयोर् विबोध्यम् ॥ = अधो॰ टी॰ २ पंक्तिः ॥

असाधारणं लक्षयति ॥ सर्वेति ॥ अनुपसंहारिणो लक्षणमाह ॥ अन्वयेति ॥ विरुद्धं लक्षयति ॥ साध्येति ॥ सत्प्रतिपक्षं लक्षयति ॥ यस्येति ॥ असिद्धं विभजते ॥ असिद्ध इति ॥ आश्रयासिद्धमुदाहरति ॥ गगनेति ॥ स्वरूपासिद्धमुदाहरति ॥ शब्द इति ॥ व्याप्यत्वासिद्धस्य लक्षणमाह ॥ सोपाधिक इति ॥ उपाधिलक्षणमाह ॥ साध्येति ॥ उपाधिश्चतुर्विधः । केवलसाध्यव्यापकः । पक्षधर्मावच्छिन्नसाध्यव्यापकः । साधनावच्छिन्नसाध्यव्यापकः ॥ उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति ॥ आद्यः आर्द्रेन्धनसंयोगः ॥

अन्वयव्याप्तिवान् सपक्षः
व्यतिरेकव्याप्तिवान् विपक्षः

॥ सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः ॥ यथा शब्दो नित्यः शब्दत्वादिति ॥ शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यो व्यावृत्तः शब्दमात्रवृत्तिः ॥ अन्वयव्यतिरेकदृष्टांतरहितो नुपसंहारी ॥ यथा सर्वमनित्यं प्रमेयत्वादिति ॥ अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तो नास्ति ॥ साध्याभावव्याप्तो हेतुर्विरुद्धो यथा शब्दो नित्यः कृतकत्वादिति ॥ कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तं ॥ साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः । यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववदिति शब्दो नित्यः कार्यत्वात् घटवदिति ॥ असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति ॥ आश्रयासिद्धो यथा ॥ गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवदिति अत्र गगनारविंदमाश्रयः स च नास्त्येव ॥ स्वरूपासिद्धो यथा ॥ शब्दो गुणश्चाक्षुषत्वादिति ॥ अत्र चाक्षुषत्वं शब्दे नास्त्येव शब्दस्य श्रावणत्वात् ॥ सोपाधिर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः ॥ साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् ॥

प्रागभावप्रतियोगित्वं कार्यत्वं =

॥ उद्भूतरूपवत्त्वोपाधित्वात् असदनुमानोयम् ॥

द्वितीयो यथा ॥ वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वं ॥ तृतीयो यथा ॥ ध्वंसाभावो विनाशी जन्यत्वाद् इत्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं ॥ चतुर्थस्तु प्रागभावो विनाशी प्रमेयत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं ॥ श्रीरामः । श्री ॥ ॥ ॥ ॥ ॥

आश्रय जिसका असिद्ध होवे ना होवे सो आश्रयासिद्ध होता है ॥ अत्र सुरभि अरविंदत्वात् इस हेतु का गगनारविंद हेतु आश्रय सो आकाश में कमल होता ही नहीं है इस से आश्रयासिद्ध हेतु भया । अतः असद्धेतुः ॥ = मूलस्य २ पंक्तिः ॥

सत्प्रतिपक्षः नाम सन् विद्यते प्रतिपक्षः शत्रुर्यस्य अ सौ सत्प्रतिपक्षः = मूलस्य ५ पंक्तिः ॥

वायुः प्रत्यक्षः प्रमेयत्वात् इत्यत्र उद्भूतरूपवत्त्वोपाधिः स च केवलसाध्यव्यापकोन कथं यत्र २ प्रत्यक्षत्वं तत्र २ उद्भूतरूपवत्त्वं यथा घटे । पुनः प्रत्यक्षत्वं वायो प्रत्यक्षत्वस्य उद्भूतरूपवत्त्वं नास्तीति अतः सोपाधिः साध्यव्यापको नास्तीति ॥ प्रमेयत्वात् । तत्रोद्भूतरूपवत्त्वं ... द्रव्यत्वावच्छिन्नप्रत्यक्षत्वं यत्र तत्रोद्भूतरूपवत्त्वं इति कृत्वा वायो ...

यत्र २ प्रमेयत्वं तत्र २ अनित्यत्वं प्रमेयत्वं कुत्र आकाशादौ तत्र अनित्यत्वाभावः इत्यन्वयदृष्टांतः यत्र २ अनित्यत्वाभावः तत्र २ प्रमेयत्वाभावः अनित्यत्वाभावः कुत्र आकाशादौ तत्र अनित्यत्वाभावोन इति व्यतिरेकदृष्टांतः ॥ मूलस्य = ३

चाक्षुषत्वात् नाम चक्षुर्विषयत्वात् = ८

प्रागभावस्य उत्पत्तिर्नास्ति विनाशित्वमपि वर्तते । ध्वंसाभावस्य उत्पत्तिर्वर्तते विनाशित्वं नास्ति । अभावस्य लेसर्वत्र कर्मधारय कर्तव्यः ध्वंस ... प्रागभावः ... वेत्यादि = २

... प्रत्यक्षत्वं नायाति ॥ = ३

१ पुनः साध्यका ४ =

अन्वयव्याप्तिमें प्रथमहेतु काउच्चारण करणा और व्यतिरेकव्याप्तिमें प्रथम साध्यका पुनः हेतुका, यथा, यदितरे भ्यो न भिद्यते न तद्गंधवत् ॥ न कस्याविपर्ययोऽयं ॥

= सकल स्याभावः साकल्यं सर्वेग सम्बन्धवानित्यर्थः =

हेतुसाध्ययोस्सहचारव्याप्तिः =
हेतुसाध्ययोः साकल्येनैवं धो व्याप्तिर्वा ॥ =१

॥ व्यतिरेकिणो लक्षणमाह ॥ व्यतिरेकेति ॥ साध्याभावसाधनाभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः ॥ व्यतिरेकमुदाहरति ॥ पृथिवीति ॥ ननु इतरभेदः प्रसिद्धो न वा आद्ये यत्र प्रसिद्धस्तत्र हेतुसत्त्वे अन्वयित्वं असत्त्वे असाधारण्यं द्वितीये साध्यज्ञानाभावात्कथं तद्विशिष्टानुमितिः विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात् प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि न स्यादिति चेन्न जलादित्रयोदशान्योन्याभावानां त्रयोदशासु प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यामेव साध्यते तत्र त्रयोदशत्वावच्छिन्नसाध्यस्यैकाधिकरणवृत्तित्वाभावात् नान्वयित्वं नासाधारण्यं प्रत्येकाधिकरणप्रसिद्ध्या साध्यविशिष्टानुमितिः ॥ साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति व्यतिरेकिव्याप्तिं निरूपयति ।यदितरेति ॥ पक्षलक्षणमाह ॥ संदिग्धेति =

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि यथा पृथिवी इतरेभ्यो भिद्यते गंधवत्त्वात् यदितरेभ्यो न भिद्यते न तद्गंधवत् यथा जलं न चेयं तथा तस्मान्न तथेति अत्र यद्गंधवत्तदितरेभ्यो भिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् संदिग्धसाध्यवान्पक्षः यथा धूमवत्त्वे हेतौ पर्वतः निश्चितसाध्यवान्सपक्षः यथा तत्रैव महानसः निश्चितसाध्याभाववान् विपक्षः यथा तत्रैव महाह्रदः सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः सव्यभिचारोऽनैकान्तिकः स त्रिविधः साधारणाऽसाधारणानुपसंहारिभेदात् तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः ॥ यथा पर्वतो वह्निमान् प्रमेयत्वादिति ॥ प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ॥

=भावि=
नित्यशुद्धबुद्धमुक्तस्वरूपः इत्यादिवेदवाक्यैः

ग्धेति ॥ ननु श्रवणानन्तरं मननस्थलेऽव्याप्तिस्तत्र वेदवाक्यैरात्मनो निश्चितत्वेन संदेहाभावात् किं च प्रत्यक्षेऽपि वह्नौ यत्रेच्छयानुमितिस्तत्राव्याप्तिरिति चेन्न उक्तपक्षताश्रयत्वस्य पक्षलक्षणत्वात् ॥ सपक्षलक्षणमाह ॥ निश्चितेति । विपक्षलक्षणमाह ॥ निश्चितेति ॥ एवं सद्धेतुं निरूप्यासद्धेतुं निरूपयितुं विभजते । सव्यभिचार इति ॥ अनुमितिप्रतिबंधकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं ॥ सव्यभिचारं विभजते । स त्रिविध इति ॥ साधारणं लक्षयति ॥ तत्रेति ॥ उदाहरति ॥ य

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः =४

निश्चय =

त्रयोदशानां भेदः पृथिव्यामेव साध्यते इत्यर्थः =४

अन्वय ग =५

व्यतिरेकित्वं =६

१

धूमवत्त्वे हेतौ =८

भाव ज्ञाने स्य प्रतियोगी ज्ञानं कारणत्वात् =३
स्य

गंधा
इयं पृथिवी तथा न नाम इतरभेदाभाववती न तस्मात् नाम इतरभेदाभाववती वेत्यादि तथा न नाम गंधाभाववत्त्वाभावात् तथा न नाम इतरभेदाभाववती न किंतु इतरभेदवती । =२

नित्यशुद्धबुद्धमुक्तस्वभावोऽयमात्मा इत्यादिवेदवाक्यैः =४

श्रव =

प्रमेयत्वं चेतरभिन्नत्वेनानुमाने आत्मा इतरेभ्यो भिद्यते आत्मत्वात् घटवत् यथा घटः इतरेभ्यो न भिद्यते न तत्तथात्मत्ववत् । व्यतिरेके =२
यत् इतरेभ्यो न भिद्यते न तदात्मत्ववत्
यत्र यत्र आत्मत्वं तत्र तत्र इतरभेदः इत्यन्वयव्याप्तिः अत्रान्वयव्याप्तिर्न भवति कुतः बहुषु स्थलेषु आत्मत्वाभावात् किंतु आत्मत्वं आत्मन्येव सत्त्वात् ॥
यत्र यत्र इतरेभ्यो भेदस्याभावः तत्र तत्र आत्मत्वाभावः यथा घटे इतरेभ्यो भेदस्याभावो वर्तते तत्रात्मत्वाभावोऽपि ॥ इति व्यतिरेकव्याप्तिः । अत्र व्यतिरेकव्याप्तिः । अतः व्यतिरेके घटवदित्युक्तम् । ... ॥ =४

उक्तपक्षतेति । उक्तपक्षतावान्यः स पक्षो गृह्यते =३

अत्र व्यतिरेकव्याप्ति (अरे मैत्रेयी याज्ञवल्क्यस्त्री अत्र एवार्थे वा शब्दः)

इतरेषां हेत्वाभासानां परामर्शप्रतिबंधकत्वं अर्थात् और जो हेत्वाभास हैं
सो परामर्श के प्रतिबंधक हैं अतः परामर्शद्वारा अनुमितेः प्रतिबन्धकाः = २

पर्वतो धूमवान् वह्निमत्वात्
इत्यत्र धूम साध्यः ॥ साध्यो धूमः
तस्याधिकरणं महानसं स तु पुनः
महानसैवाधिकरणं यस्यात्यन्ता
भावस्य ॥ सो महानसे कस्याऽत्यन्ता
भावः हस्त्याद्यभावः तत्प्रति
योगी हैं हस्त्यादि अप्रतियो
~~(गी अन्यत्सर्वे)~~ गी तु येषां तत्रात्य
न्ताभावो वर्तते तेभ्यः अन्यत्सैवे
सकः आर्द्रेन्धनः ॥ साध्यो धूमः
तत्समानाधिकरणं महानसः
तत्रवर्तते योऽत्यन्ताभावः स तु
हस्त्याद्यभावः तत्प्रतियोगी
हस्त्यादि अप्रतियोगी आर्द्रेन्ध
नः ॥ इति कृत्वा साध्यव्याप
कत्वमायाति ॥ = ५

साध्य,
बाधितस्य लक्षणमाह ॥ यस्येति ॥ अत्र बाधितस्य व्याप्त्यभावनिश्चयत्वेन सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन सा
ध्यानुमितिप्रतिबंधकत्वं इतरेषां तु परामर्शप्रतिबंधकत्वं तत्रापि साधारणस्य व्यभिचाराभाववत्तया विरुद्धस्य
सामानाधिकरण्याभाववत्तया व्याप्यत्वासिद्धस्य विशिष्टव्याप्त्यभाववत्तया असाधारणानुपसंहारिणोर्व्याप्ति
संशयाव्यापकत्वेन च व्याप्तिज्ञानप्रतिबंधकत्वं आश्रयासिद्धस्वरूपासिद्धयोः पक्षधर्मताज्ञानप्रतिबंधक

साधनवत्तिनिष्ठाय यस्यात्यन्ताभावस्य
स साधनवन्निष्ठात्यन्ताभावः

साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वं साधनवन्निष्ठात्यन्ताभा
वप्रतियोगित्वं साधनाव्यापकत्वं पर्वतो धूमवान् वह्निमत्वादित्यत्राार्द्रेन्धनसंयोग उपाधि
र्यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकत्वात् यत्र वह्निस्तत्रार्द्रेन्धनसंयोग इति नास्ति
अयोगोलके आर्द्रेन्धनसंयोगाभावात् एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रे
न्धनसंयोग उपाधिः सोपाधिकत्वाद्वह्निमत्वं व्याप्यत्वासिद्धं यस्य साध्याभावः प्रमाणे
न निश्चितः स बाधितो यथा वह्निरनुष्णो द्रव्यत्वादिति अत्रानुष्णत्वं साध्यं तदभावः
उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वं व्याख्यातमनुमानम् ॥

व्या = १

सं = ३

पर्वतो धूमवान् वह्निमत्वात् इत्यत्र
साधनं वह्निः स विद्यते यत्र तत्
साधनवत् तस्मिन् निष्ठनाम स्थि
तः योऽत्यन्ताभावः स तु हस्त्याद्यभा
वः तत्प्रतियोगी हस्त्यादि इति
कृत्वा साधनाऽव्यापकत्वमायाति
साधनवन्निष्ठात्यन्ताभावप्रतियो
गित्वं साधनाव्यापकत्वं ॥ साधन
वाले में स्थित जो अत्यन्ताभाव
तिसका जो प्रतियोगि सो साध
नाव्यापक होता है ॥ इहां साधन
वह्नि उसवाला महानस रसोइ
स्थान उसमें अत्यन्ताभाव हस्त्यादि
योंका उसके प्रतियोगी हस्त्या
दि स साधनाऽव्यापकः । = ६

त्वमुपाधिस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबंधकः सिद्धसाधनं तु पक्षविघटकतयाऽऽश्रयासिद्धेरन्त
र्भवतीति प्राञ्चः ॥ निग्रहस्थानान्तरमिति नवीनाः ॥ श्रीरामाय नमः । शुभम् ॥ श्रीः । अस्तु ॥

घटना =
पक्षस्य विगतः घटकता इति पक्षविघ
टकता तया = २

सत्तपदार्थेभ्योऽतिरिक्ता इति मीमांसकाः =२

१०

उपमानं लक्षयति ॥ उपमितीति ॥ शाब्दं लक्षयति ॥ आप्तेति ॥ वाक्यं लक्षयति । वाक्यमिति ॥ पदस्य लक्षणमाह ॥ शक्तमिति ॥ अर्थस्मृत्यनुकूलः पदपदार्थसंबंधः शक्तिः सा च पदार्थान्तरमिति मीमांसकाः तन्निरासार्थमाह ॥ अस्मादिति ॥ डित्थादीनामिव घटादीनामपि संकेत एव शक्तिः न तु पदार्थान्तरमित्यर्थः गवादिशब्दानां जातावेव शक्तिर्विशेषणतया जाते प्रथममुपस्थितत्वात् व्यक्तिलाभस्तु आक्षेपादिना इति केचित् तन्न गामानयेत्यादौ वृद्धव्यवहारे सर्वगानयनादेर्व्यक्तावेव संभवेन जातिविशिष्टव्यक्तावेव शक्तिकल्पनात् शक्तिग्रहश्च वृद्धव्यवहारेण भवति तथाहि व्युत्पित्सुर्बालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानंतरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्यान्वय ।

पूर्वं कृततर्कमधीयान भट्टगालो जायते वने ॥ नकुलस्य पदीयः ॥ =

न=२

उपमितिकरणमुपमानं संज्ञासंज्ञिसंबंधज्ञानमुपमितिः तत्करणं सादृश्यज्ञानं तथाहि कश्चित् गवयशब्दवाच्यमजानन् कुतश्चिदारण्यकपुरुषाद्गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पश्यति तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते ॥ आप्तवाक्यं शब्दः आप्तस्तु यथार्थवक्ता वाक्यं पदसमूहः ॥ यथा गामानयेति शक्तं पदमस्मात्पदादयमर्थो बोधव्य इतीश्वरसंकेतः शक्तिः ॥

॥ उलटापलटा ॥

वधबन्धने=४

व्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्याश्वमानय गां बधानेति वाक्यान्तरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः अश्वपदस्याश्वत्वविशिष्ट इति व्युत्पद्यते ननु सर्वत्र कार्यपरत्वाद्व्यवहारस्य कार्यवाक्य एव व्युत्पत्तिः न सिद्धपरः इति चेन्न काश्यां त्रिभुवनतिलको भूपतिरित्यादौ सिद्धेऽपि व्यवहारात् विकसितपद्मे मधूनि पिबति मधुकर इत्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेऽपि

मधुकरादिपदव्युत्पत्तिदर्शनाच्च ॥ लक्षणाऽपि शब्दवृत्तिः

शक्यसंबंधो लक्षणा गंगायां घोषः ॥ ६ ॥

येन विनाऽनुपपन्नं तत्तेनाक्षिप्यते =४

शक्तिग्राह्योऽर्थः शक्यः =

शिवः
१०

सकृदुच्चारितः शब्दः सकृदर्थं बोधयति शक्तेर्विरम्यव्यापाराभावः इति ॥ = १

पदोत्तरत्वापदोत्तरत्वयोः परित्या
गेन चैतन्यांशयोरैक्यसंभवः ॥ = ४

ग = १

॥ इत्यत्र गंगापदवाच्यप्रवाहसंबंधादेव तीरोपस्थितौ तीरेऽपि शक्तिर्न कल्प्यते सैंधवादौ लवणाश्वयोः परस्परसंबं
धाभावात् नानाशक्तिकल्पनं लक्षणा त्रिविधा जहल्लक्षणा ऽजहल्लक्षणा जहदजहल्लक्षणा चेति यत्र वाच्यार्थ
स्यान्वयाभावस्तत्र जहदिति ॥ यथा मंचाः क्रोशन्ति यत्र वाच्यस्याप्यन्वयस्तत्राजहदिति यथा कुंता गं
च्छन्ति ॥ यत्रैकदेशत्यागेनैकदेशान्वयस्तत्र जहदजहदिति ॥ यथा तत्त्वमसीति गौण्यपि लक्षणैव लक्ष्यमाण
गुणसंबंधस्वरूपा अग्निर्माणवक इति व्यंजनापि लक्षणान्तर्भूता शब्दशक्तिमूला ऽर्थशक्तिमूला चानुमा
नादिनाऽन्यथासिद्धा तात्पर्यानुपपत्तिः लक्षणाबीजं तत्तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यत्वं तात्पर्यत्वे ज्ञानं
च वाक्यार्थज्ञाने हेतुर्नानार्थानुरोधात्प्रकरणादिकं तात्पर्यग्राहकं द्वारमित्यादौ पिधेहि इति शब्दाध्याहारः ननु

आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकां
क्षा अर्थाबाधो योग्यता पदानामविलंबेनोच्चारणं सन्निधिः ॥ छ ॥ श्रीः ॥ छ ॥ श्रीः ॥ छ ॥

शब्दाध्याहारस्यार्थज्ञानार्थत्वात्कृदस्यार्थमविज्ञाय शब्दाध्याहारासंभवादर्थाध्याहार एव युक्त इति चेन्न पदविशे
षजन्यपदार्थोपस्थितेः शाब्दज्ञाने हेतुत्वादन्यथा घटः कर्मत्वमानयनं कृतिरित्यत्रापि शाब्दज्ञानप्रसंगात् पंकजा
दिपदेषु योगरूढिः अवयवशक्तिर्योगः समुदायशक्ती रूढिः नियतपद्मज्ञानार्थं समुदायशक्ति अन्यथा कु
मुदेऽपि प्रयोगप्रसंगः इतरान्वितेऽशक्तिरिति प्राभाकराः अन्वयस्य वाक्यार्थतया भानसंभवात् अन्वयांशेऽपि
न शक्तिः कल्पनीयेति गौतमीयाः आकांक्षेति आकांक्षादिज्ञानमित्यर्थः अन्यथाऽऽकांक्षाविभ्रमात् कृदधीभ्र
मो न स्यात् ॥ आकांक्षालक्षयति ॥ पदस्येति ॥ योग्यतालक्षणमाह ॥ अर्थेति ॥ सन्निधिलक्षणमाह ॥ प
दानामिति ॥ अविलंबेन पदार्थोपस्थितिः सन्निधिरुच्चारणं तु तदुपयोगितयोक्तम् ॥ छ ॥ छ ॥

गङ्गा गच्छसि हे तात वंद्यानः सन्तु ते शिवा ममापि जन्मतत्रैव भूयाद्यत्र
गतो भवान् इत्यत्र तत्कृमनानाम प्राण वियोगो भविष्यतीति बोधा
द्धि जनानां वदस्यान्तरमेकृन्तालंकारिकास्तत्र लक्षणयां तदन्त
र्भावात् ॥ = ५

गौरश्व इति घटः कर्मत्वमित्यनाकांक्षोदाहरणं द्रष्टव्यं वैदिकस्य लक्षणमाह॥ वैदिकमीश्वरोक्तत्वात् इति ननु वेदस्यानादि
त्वात्कथमीश्वरोक्तत्वमिति चेन्न वेदः पौरुषेयः वाक्यसमूहत्वात् भारतादिवत् न च स्मर्यमाणकर्तृत्वमुपाधिर्गौतमादिभिः
शिष्यपरंपरया वेदेऽपि कर्तृत्वस्मरणेन साधनव्यापकत्वात् तस्मात्तपनात्त्रयो वेदा जायंते इति श्रुतेश्च ननु वर्णा नित्याः ति=४
११ स एवायं गकारः इति प्रत्यभिज्ञाबलात् तथा च कथं वेदस्यानित्यत्वमिति चेन्न उत्पन्नो गकारो नष्टो गकार इति प्रती
त्या वर्णानामनित्यत्वात् सोयं गकार इति प्रत्यभिज्ञायाः सेयं दीपज्वालेतिवत् जात्यवलंबनत्वात् वर्णानां नित्य
॥ त्वेपि आनुपूर्वीविशिष्टवाक्यस्यानित्यत्वात् नैव तस्मादीश्वरोक्तो वेदः मन्वादिस्मृतीनामाचाराणां च वेदमूल

आकांक्षादिरहितं वाक्यमप्रमाणं तथा गौरश्वः पुरुषो हस्ती न प्रमाणं आकांक्षाविरहात् अग्निना
सिंचेदिति न प्रमाणं योग्यताविरहात् प्रहरे प्रहरे असहोच्चारितानि गामानयेत्यादि पदानि न प्रमाणं
सान्निध्याभावात् वाक्यं द्विविधं वैदिकं लौकिकं च वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणं लौकि
कं तु आप्तोक्तं प्रमाणं वाक्यार्थज्ञानं शाब्दज्ञानं तत्करणं शब्दः॥ इति यथार्थानुभवो निरूपितः॥

कतया प्रामाण्यं स्मृतिमूलवाक्यानामिदानीमनध्ययनात् तन्मूलभूता काचिच्छाखा विच्छिन्नेति कल्पते ननु पठ्यमानवेदवाक्यो
नाशस्य=२ त्सादस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वात् नित्यानुमेयो वेदो मूलमिति चेन्न तथापि वर्णानुपूर्वीज्ञानाभावेन ।
बोधकत्वासंभवात् नन्वेतानि पदानि स्मारितार्थसंसर्गवंति आकांक्षादिमत्पदकदंबकत्वात् मत्वाक्यवत् इत्यनुमाना
देव संसर्गज्ञानसंभवात् शब्दो न प्रमाणांतरमिति चेन्न अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणस्य शब्दात्प्रत्येमी
त्यनुव्यवसायसाक्षिकस्य सर्वसंमतत्वात्॥ ननु अर्थापत्तिरपि प्रमाणांतरमस्ति पीनो देवदत्तो॥ रामाय नमः॥
॥वासुदेवाय॥ श्रीः॥ शुभम्॥ श्रीः। शुभम्॥ श्रीः। शुभम्॥ श्रीः॥

शिवः
११

श्वेतत्वाश्रयः १ तदर्थः श्वेतत्वावांतरैकत्वाद्याश्रयः श्वेतत्वाश्रयत्वाद्योग्य दधिकसंख्या ३३ श्रयः स्वतत्वसंख्याश्रयो यथैकत्वाधिक संख्या ३३ श्रयः एकत्वाश्रयोऽदृष्टः यथाऽदित्वाद्याश्रयः
श्रयं पुरुषः एवं च श्वेतत्वमुद्रिकावान् एवं चाश्वदधिकमुद्रिकावत्त्वात् ॥ एतन्मात्रहस्तनिकेत वन्मागाभ्यामेतावन्मात्रवस्था एतावन्मात्रे दिशु से रथं पुरुषः स्वजनक कृतिमत् संबंधे नैता
वदित्यादिशब्दवानुरोन्वस्तविकसितं पुलिकहस्तचेष्टावत्वाद्योयादृशी चेष्टावान्सतादृशवान् यथा ३३ ज्ञाना भि... म गो... र्व हस्त... चेष्टावान्पुरुषः अयं चेष्टा एवं च पु
रुषान्वक्ति एवं च संख्यापूर्वक चेष्टावत्वात् ॥ तादृशमच्चेष्टावत् ॥
साध्यः हेतुः लोपि पृष्ठी= पक्षः

दिवानुभुंक्त इति दृष्टे श्रुते वा पीनत्वान्यथानुपपत्त्या रात्रिभोजनमर्थापत्त्या कल्प्यत इति चेन्न देवदत्तो रात्रौ भुंक्ते दिवाऽभुंजान
त्वे सति पीनत्वात् इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् शतेऽपि चाशादिति संभवोप्यनुमानमेव इह वटे यक्ष इति ऐ-
तीह्येतिह्यमपि अज्ञातमूलवक्तृकः शब्द एव चेष्टापि शब्दानुमानद्वारा व्यवहारहेतुरिति न मानांतरं तस्मा
त्प्रत्यक्षानुमानोपमानशब्दा अत्वार एव प्रमाणानि ॥ ज्ञानानां तद्वति तत्प्रकारकत्वं स्वतोग्राह्यं परतो वेति विचा
र्यते तत्र विप्रतिपत्तिः ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा अत्र विधि-
कोटिः स्वतस्त्वं निषेधकोटिः परतस्त्वं अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति इदं ज्ञानमप्रमे
ति ज्ञानेन प्रामाण्याग्रहात् तद्वारणाय अप्रामाण्याग्राहकेति इदं ज्ञानमप्रमेत्यनुव्यवसायनिष्ठप्रामाण्यग्रा
हकस्य अप्रामाण्याग्राहकत्वाभावात् स्वतस्त्वं न स्यात् अतस्तदिति तस्मिन्प्रामाण्याश्रये अप्रामाण्या
ग्राहक इत्यर्थः उदाहृतस्थले व्यवसाये अप्रामाण्यग्राहकस्यापि अनुव्यवसाये तदग्राहकत्वात् स्व
तस्त्वसिद्धिः ननु स्वत एव प्रामाण्यं गृह्यते घटमहं जानामीत्यनुव्यवसायेन घटघटत्वयोरिव तत्संबंधस्यापि वि
षयीकरणात् व्यवसायरूपप्रत्यासत्तेः उभयत्र तुल्यत्वात् पुरोवर्तिनि तत्प्रकारसंबंधस्यैव प्रमात्वपदार्थत्वादिति
चेन्न स्वतः प्रामाण्यग्रहे जलज्ञानं प्रमा न वेत्यनभ्यासदशायां प्रमात्वसंशयो न स्यात् अनुव्यवसायेन प्रामाण्यस्य नि
श्चितत्वात् तस्मात्स्वतो ग्राह्यत्वाभावात् परतो ग्राह्यत्वं तथाहि प्रथमं जलज्ञानानन्तरं प्रवृत्तौ सत्यां जलला
भे सति पूर्वोत्पन्नं जलज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् ॥ यन्नैवं तन्नैवं यथाऽप्रमेति व्यतिरेकिणापि
प्रमात्वं निश्चीयते द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टांतेन तत्सजातीयतालिंगेन अन्वयव्यतिरेकिणापि गृह्यते
प्रमायां गुणजन्यत्वमुत्पत्तौ परतस्त्वं प्रमासाधारणकारणं गुणः ॥ रामाय ॥ शिवायनमः ॥

इदं जलज्ञानं प्रमा पूर्वोत्पन्नजलज्ञानसजातीयत्वात् यदेवं तदेवं यथा प्रथमज्ञानं यन्नैवं तन्नैवं यथा जलभ्रमः ॥ = २

स्वरूपतोपि विषयं श्चाग्रहीतविवेके नैकत्र ज्ञानत्वं व्याप्तिदित्युक्तं भवति एकविषयानेकज्ञाने षति व्याप्तिपरिहारार्थं स्वरूपपदं समूहालंबनज्ञानेऽतिव्याप्ति
परिहारार्थं विषयत इति विशेषणम् ॥ = ६ ॥

अप्रमाऽसाधारणकारणं दोषः । तत्र प्रत्यक्षे विशेषणवत् विशेष्य सन्निकर्षो गुणः अनुमितौ व्यापकवति व्याप्यज्ञानमुपमितौ
यथार्थसादृश्यज्ञानं । शब्दज्ञाने यथार्थयोग्यताज्ञानमित्यायूहनीयं । पुरोवर्तिनि प्रकाराभावस्य यं वसायेन अनुपस्थि
तत्वात् अप्रमात्वं परतस्त्वेव गृह्यते पित्तादिदोषजन्यत्वादुत्पत्तौ परतस्त्वं ननु सर्वज्ञानानामयथार्थत्वादयथार्थज्ञान
१२ ज्ञा = ४ मेव नास्ति नच शुक्तावपिदं रजतमिति ज्ञानात्प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरिति वाच्यं रजतस्मृति पुरोवर्ति
12 ज्ञानाभ्यामेव प्रवृत्तिसंभवात् उपस्थितेष्टभेदाग्रहस्यैव सर्वत्र प्रवर्तकत्वेन नेदं रजतमित्यादावतिप्रसंगाभा
वादिति चेन्न सत्यरजतस्थले पुरोवर्तिविशेष्यकरजतत्वप्रकारकज्ञानस्यैव लाघवेन प्रवृत्तिजनकतया शुक्ता

अयथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात् ॥ एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्या
वगाहिज्ञानं संशयः ॥ यथा स्थाणुर्वा पुरुषो वेति । मिथ्याज्ञानं विपर्ययः । यथा शुक्ताविदं रजतमिति ॥
व्याप्यारोपेण व्यापकारोपस्तर्कः ॥ यथा यदि वह्निर्न स्यात्तर्हि धूमोपि न स्यादिति ॥ स्मृतिरपि
द्विविधा ॥ यथार्थाऽयथार्था च प्रमाजन्या यथार्था अप्रमाजन्या अयथार्था सर्वेषामनुकूल
वेदनीयं सुखं प्रतिकूलवेदनीयं दुःखं इच्छा कामः क्रोधो द्वेषः कृतिः प्रयत्नः ॥ ॥

वपि रजतार्थिकं प्रवर्तकत्वेन विशिष्टज्ञानस्यैव कल्पनात् ॥ अथायथार्थज्ञानं विभजते ॥ अयथार्थ इति ॥ स्वप्नस्य मानस
सविपर्ययरूपत्वान्नैविध्यविरोधः ॥ संशयलक्षणमाह ॥ एकेति ॥ घटपटाविति समूहालंबनेऽतिव्याप्ति
वारणाय एकेति । घटो द्रव्यमित्यादावतिव्याप्तिवारणाय विरुद्धेति पटत्वविरुद्धघटत्ववानित्यत्रातिव्याप्ति
वारणाय नानेति ॥ विपर्ययलक्षणमाह ॥ मिथ्येति । तदभाववति तत्प्रकारकनिश्चय इत्यर्थः ॥ तर्कलक्ष
णमाह ॥ व्याप्येति ॥ यद्यपि तर्को विपर्ययेऽन्तर्भवति तथापि प्रमाणानुग्राहकत्वाद्भेदेन कीर्तनं ॥ स्मृतिं
विभजते ॥ स्मृतिरिति ॥ सुखं लक्षयति ॥ सर्वेषामिति ॥ सुख्यहमित्याद्यनुव्यवसायगम्यं । सुखत्वादिल

क्षणं ज्ञानकालिकज्ञानमसमुत्पद्यते दुःखम् ॥

मनसः इदं ज्ञानं
मानसं = ६

शिव:
१२

सामग्र्यसमानाधिकरणमेरवत्तिगोपिताऽवच्छेदक
द्रव्यविभाजकोपाधिसमानाधिकरणसाक्षाद्व्याप्यक
जातिमत्त्वं गतिमत्वेसतिगुणत्वमिति विशेषगुण
त्वम् ॥ = ४

संस्कारं विभजते ॥ संस्कार इति ॥ संस्कारत्वजातिमान् संस्कारः वेगस्याश्रयमाह ॥ वेग इति ॥ वेगत्वजातिमान्
वेगः ॥ भावनां लक्षयति ॥ अनुभवेति ॥ आत्मात्ववत्यव्याप्तिवारणाय अनुभवेति ॥ अनुभवध्वंसेतिव्याप्तिवा
रणाय स्मृतीति ॥ स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तम् ॥ स्थितिस्थापकं लक्षयति ॥ अन्यथेति ॥ संख्यादि
योऽष्टौ नैमित्तिक द्रवत्ववेग स्थितिस्थापकाः सामान्यगुणाः अन्ये रूपादयो विशेषगुणाः द्रव्यविभाजकोपाधि
द्वय समानाधिकरणावृत्तिजातिमद्गुणत्वं विशेषगुणत्वं ॥ कर्मणो लक्षणमाह ॥ चलनेति ॥ उत्क्षेपणादी
नां कार्यभेदमाह ॥ ऊर्ध्वेति ॥ शरीरेति ॥ वक्रतासंपादकं कर्माकुंचनं । ऋजुतासंपादकं प्रसारणमित्यर्थः ॥

विहितकर्मजन्योगुणो धर्मः ॥ निषिद्धकर्मजन्यस्त्वधर्मः बुद्ध्यादयोऽष्टावात्ममात्रगुणाः बुद्धीच्छाप्रय
त्ना नित्या अनित्याश्च नित्या ईश्वरस्य अनित्याजीवस्य संस्कारस्त्रिविधः वेगोभावनास्थितिस्था
पकश्चेति वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः अनुभवजन्यास्मृतिहेतुर्भावना आत्ममात्रवृत्तिः
अन्यथाकृतस्य पुनस्तदवस्थापकः स्थितिस्थापकः ॥ कटादिपृथिवीवृत्तिः इतिगुणाः च
लनात्मकं कर्म ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं अधोदेशसंयोगहेतुरपक्षेपणं शरीरस
न्निकृष्टसंयोगहेतुराकुंचनं विप्रकृष्टसंयोगहेतुः प्रसारणं अन्यत्सर्वं गमनं नित्यमेकम
नेकानुगतं सामान्यं द्रव्यगुणकर्मवृत्तिः परं सत्ता अपरं जाति द्रव्यत्वादि नित्यद्रव्यवृत्तयो विशेषा
स्त्वनंताएव नित्यसंबंधः समवायः अयुतसिद्धवृत्तिः ययोर्द्वयोर्मध्ये एकमपराश्रितमेवावतिष्ठते तेता

सामान्यं लक्षयति । नित्यमिति ॥ परमाणुपरिमाणादावतिव्याप्तिवारणाय अनेकेति ॥ संयोगेतिव्याप्तिवारणाय नित्यमिति ॥
जलपरमाणुगतरूपेतिव्याप्तिवारणायैकेति अनुगतत्वं समवेतत्वं घटादिध्वंसाभावः घटाद्यनुगतोपि असमवेत इति ॥
तेननाभावोपत्तवतिव्याप्तिः विशेषं लक्षयति ॥ नित्येति ॥ समवायं लक्षयति । नित्येति ॥ संयोगेऽतिव्याप्तिवारणाय
नित्य इति ॥ आकाशादावतिव्याप्तिवारणाय संबंध इति ॥ अयुतसिद्धलक्षणमाह ॥ ययोरिति ॥ नीलो घट इति
विशिष्टप्रतीति विशेषणविशेष्यसंबंधविषयोविशिष्टविषयत्वात् दंडीतिप्रत्ययवत् इतिसमवायसिद्धिरिति ॥ ६ ॥

व्यावर्तकाः = ६

विनश्यद = ८

॥ अवयवावयविनावित्ति ॥ द्रव्यसमवायिकारणमवयवः तज्जन्यद्रव्यमवयवी प्रागभावंलक्षयति ॥ अनादिरिति ॥ आकाशादावति
व्याप्तिवारणायसान्तेति घटादावतिव्याप्तिवारणायानादिरिति प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनकोभवि
ष्यतीतिव्यवहारहेतुः प्रागभावः । ध्वंसंलक्षयति । सादिरिति ॥ घटादावतिव्याप्तिवारणायानन्तेति आकाशादावतिव्या
प्तिवारणायसादिरिति प्रतियोगिजन्यः प्रतियोगिसमवायिवृत्तिः ध्वस्तव्यवहारहेतुः ध्वंसः ॥ अत्यन्ताभावंलक्षयति ॥
त्रैकालिक इति ॥ अन्योन्याभावेऽतिव्याप्तिवारणाय संयोगावच्छिन्नेति ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालि
क इति ॥ अन्योन्याभावं लक्षयति ॥ तादात्म्य इति ॥ प्रतियोगितावच्छेदक आरोप्यसंसर्गभेदाद्येक प्रतियोगिकयोर
त्यन्ताभावान्योन्याभावयोर्वैलक्षण्यं केवलं देवदत्ताभावादंडाभावइति प्रतीत्या विशिष्टाभावः अतिरिक्त" एकसत्वे द्वौ न
इति प्रतीत्या द्वित्वावच्छिन्नाभावः" संयोगसंबंधेन घटवति समवायसंबंधेन घटाभावः" तत्तद्घटाभावात् घटत्वा

अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति ॥ अनादिः
सान्तः प्रागभावः उत्पत्तेः पूर्वं कार्यस्य ॥ सादिरनन्तः प्रध्वंसः उत्पत्त्यनन्तरं कार्यस्य ॥
त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः ॥ यथा भूतले घटो नास्तीति ॥
तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः यथा घटः पटो न भवति ॥

वच्छिन्नप्रतियोगिताक सामान्याभावः अतिरिक्तः एवमन्योन्याभावोऽपि । घटत्वावच्छिन्नपटो
नास्ति इति व्यधिकरणधर्मावच्छिन्नाभावो नाङ्गीक्रियते पटे घटत्वं नास्तीति तस्यार्थः सामा
न्याभावस्यातिरिक्तत्वे सति केवलान्वयी सामयिकाभावो ऽत्यन्ताभाव एव समयविशेषप्रतीयमानः घटाभा
ववति घटानयनेऽत्यन्ताभावस्यान्यत्रगमनाभावेऽपि अत्राप्रतीते घटापसरणे सति प्रतीतेः भूतलघटसंयोगप्रा
गभावध्वंसयोर्घटात्यन्ताभावप्रतीतिनियामकत्वं कल्प्यते घटवति ॥ [illegible]॥

प्रतियोग्यवृत्तिधर्मो न प्रति
योगितावच्छेदकः इति प्रा
ताम[?]णिकारमतं ॥ =२

एकविंशतिदुःखादित्यन्तिकेऽभावो केवलं मोक्ष इत्यर्थः =२

निर्वक्तुं निर्वचनकर्तुं=२

तत्संयोग प्रागभावध्वंसयोरसत्वात् अत्यन्ताभावस्याप्रतीतेः "घटापसरणे च संयोगध्वंससत्वात् प्रतीतिः" इति केवलाधिकरणादेव नास्तीतिव्यवहारोपपत्तौ अभावो न पदार्थान्तरमिति गुरुवस्तन्न अभावानङ्गीकारे कैवल्यस्य निर्वक्तुमशक्यत्वात् अभावाभावो भावस्
व नातिरिक्तः अनवस्थाप्रसङ्गात् ध्वंसप्रागभावः प्रागभावध्वंसश्च प्रतियोग्येव अभावाभावोतिरिक्त एव तृतीयाभावस्य प्रथमाभा
वरूपत्वात् नानुपपत्तिरिति नवीनाः ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभास
छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगम इति न्यायशास्त्रे षोडशपदार्थानामुक्तत्वात् कथं सप्तैवेत्यत आह ॥
सर्वेषामिति ॥ सर्वेषां सप्तस्वेवान्तर्भाव इत्यर्थः आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गा
स्तु प्रमेयमिति द्वादशविधं प्रमेयं प्रवृत्तिधर्माधर्मौ रागद्वेषमोहा दोषा रागइच्छा द्वेषो मन्युर्मोहः शरीरादावात्मभ्रमः

सर्वेषां पदार्थानां यथोक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धं ॥ कणादन्यायमतयोर्बालव्युत्पत्ति
सिद्धये अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः ॥ इति तर्कसंग्रहः समाप्तः ॥ शुभं ॥ श्री ॥ शुभमस्तु ॥

दुःखध्वंसस्य स्वपदेन ग्राह्यः =

प्रेत्यभावो मरणं फलं भोगः "अपवर्गो मोक्षः" स च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः प्र
योजनं सुखप्राप्तिर्दुःखहानिश्च दृष्टान्तो महानसादिः प्रमाणिकत्वेनाभ्युपगतोऽर्थः सिद्धान्तः निर्णयो निश्चयः प्रमा
णफलं तत्वबुभुत्सोः कथावादः उभयसाधनवती विजिगीषुकथा जल्पः स्वपक्षस्थापनहीना वितण्डा कथा नाम नानाव
क्तृकपूर्वोत्तरपक्षप्रतिपादकवाक्यसन्दर्भः "अभिप्रायान्तरेण प्रयुक्तस्य वाक्यस्यार्थान्तरं प्रकल्प्य दूषणं छलं असदुत्त
रं जातिः साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुपपत्ति
संशयप्रकरणहेत्वर्थापत्त्यविशेषोपलब्ध्यनुपलब्धिकारणनित्यानित्यकार्यकार्यसमा जातयः वादिनोऽपजयहेतुः निग्रह ॥ श्री ॥

दुःखध्वंस इति कथनेन इदानीमस्मदादीनां किञ्चित् दुःखध्वंसो वर्तते इदानीं मोक्षापत्तिः तद्वारणाय दुःखप्रागभावासमानकालीनो
वाच्यः इति कथनेन इदानीं कालेऽस्मदादीनां दुःखप्रागभावोऽस्ति दुःखध्वंसो भवति वामनादीनां मोक्षस्तत्ताऽतः समानका
लीनो भवति न तु समानकालीनः अतोऽव्याप्तिः तद्वारणाय स्वसमानाधिकरणेति वाच्यः स्वकथनेन वामदेवादीनां दुःख
ध्वंसस्तदधिकरणे आत्मनि दुःखप्रागभावो नास्ति ॥ =६

व=४

स्वास =
=
आद्य प्राणसंयोगः जीवनं
अन्त्य प्राणवियोगो मरणं =६

यथा नक्कं वलोयं देव
दत्तः
नवीन कंबल वाला देवद
त्त है किसी ने अर्थान्तर
प्रकल्पना किया कि न
व संख्या कंबल वाला
देवदत्त है ।=४

दुःखानां ध्वंसः दुःखध्वंसः दुःखानि च षडिन्द्रियाणि षड्ज्ञानानि षड्विषयाः शरीराणि
चेत्येकविंशतिः इन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणमनांसि । ज्ञानानि श्रोत्रत्वाचचाक्षु
षजैह्वघ्राणजमानसानि ॥ विषयाः । शब्दस्पर्शरूपरसगन्धसुखदुःखानि धर्माधर्म
=६

ननु दाहो त्वादे वह्निः शक्त इति व्यवहारा ... नुपपत्यासे तस्य तत्तिदि क्त शक्ति रित्या शंक्य तस्याः कारणता स्यपि ते ऽपि व्यवहारोपपत्तेर्नातिरिक्त शक्तिसिद्धिरित्याह कारणत्वस्येति ॥ = ५

विधुशास्त्रे =

१४ 14

अत्र स्पर्श नाम मलीन वस्त्र उसका जो स्पर्श उसका प्रतियोगी मलीन वस्त्र अत्र सम्बन्धे प्रतियोगी भी ता वर्तते यथा घट स्पर्श का प्रतियोगी घटः । अत्र भावे पि प्रतियोगी भी ता स्ति पुनः । यथा घट अभाव का घट प्रतियोगी द्विधा प्रतियोगी ता स्ति । अंग संबन्धे प्रतियोगी तां बोधयेत् बुधः ।=

स्थानं प्रतिज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वंतरं अर्थांतरं निरर्थकम् अविज्ञातार्थं अपार्थकं अप्राप्त
कालं न्यूनं अधिकं पुनरुक्तं अननुभाषणं अज्ञानं अप्रतिभा विक्षेपः मतानुज्ञाय पर्यनुयोज्योपेक्षणं निरनुयोज्या
नुयोगः अपसिद्धांतः हेत्वाभासश्च निग्रहस्थानानि शेषं सुगमं ननु करतलानलसंयोगे सत्यपि प्रतिबंधके सति
८ दाहानुपपत्तेः शक्तिः पदार्थांतरमिति चेन्न प्रतिबंधकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात् कारण
त्वस्यैव शक्तिपदार्थत्वात् ननु भस्मादिना कांस्यादेः शुद्धिदर्शनात् आधेयशुद्धिरंगीकार्येति चेन्न भस्मादि सं
योगसमानकालीन अस्पृश्यस्पर्श प्रतियोगिकयावदभाव सहित भस्मादि संयोगध्वंसस्य शुद्धिपदार्थत्वात् स्वत्वम
पि न पदार्थान्तरम् यथेष्ट विनियोगयोग्यत्वस्य स्वत्वस्वरूपत्वेन क ज्ञानविषयो विधिः तत्प्रतिपादकः लिङादि कृ
त्यसाध्ये प्रवृत्त्यदर्शनात् कृतिसाध्यताज्ञानं प्रवर्तकं न च विषभक्षणादौ प्रवृत्तिप्रसंगः इष्टसाधनतालिंगक कृति
साध्यता ज्ञानस्य काम्यस्थले विहितकालजीवित्वनिमित्त ज्ञानजन्यस्य नैमित्तिकस्थले प्रवर्तकत्वात्
न चाननुगमः स्वविशेषणवत्ताप्रतिसंधानजन्यत्वस्य अनुगतत्वादिति गुरवः तन्न लाघवेन कृतिसा
ध्येष्टसाधनताज्ञानस्यैव चिकीर्षाद्वारा प्रवृत्तिद्वारा जनकत्वात् न च नित्ये इष्टसाधनत्वाभावादप्रवृ
त्तिप्रसंगः तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्वकल्पनात् तस्मात् कृतिसाध्येष्टसा
धनत्वमेव लिङर्थः ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र लिङा स्वर्गसाधनं कार्यं प्रतीय
ते यागस्य आशुविनाशिनः कालांतरभाविस्वर्गसाधनत्वायोग्यत्वात् योग्यस्यापि कार्यं अपूर्वमेव लिङर्थः कार्यं कृतिसा
ध्यं कृतेः सविषयत्वात् विषयाकांक्षायां यागो विषयत्वेनान्वेति कस्य कार्यमिति नियोज्याकांक्षायां स्वर्गकामपदं नियो
ज्यपरतयान्वेति कार्यबोद्धा नियोज्यः तेन ज्योतिष्टोमनामकयागविषयं स्वर्गकामस्य कार्यमिति वाक्यार्थः संपद्यते
वैदिकलिङ्त्वात् यावज्जीवमग्निहोत्रं जुहुयात् इति नित्यवाक्येपि अपूर्वमेव वाच्यं कल्प्यते आरोग्यकामो भेषजं पानं
सेत्यता तावच्छेदे ... क अग्न्यादि पदार्थाः संति मिता न रायी =

[illegible]

नित्य = ५

पुरुष = ४

शिवः
१४

कीर्तनादीभिकर्मनाशाज्ञलस्पर्शविलंकर तोयाविलंघनात गंडकीवाहुतौएग्नर्मः
नरतिकीर्तनात् =१

यागस्याप्य इतिस्वजन्यव्यापारवत्वसंबंधेन
यागोप्यऽस्ति =१

यागस्याप्ययोग्यता निश्चयाभावेन साधनत्वाप्रतीत्यनंतरं तन्निर्वाहार्थं अवांतर व्यापारतयाऽपूर्वकल्पनात् कीर्तनादिनानाश श्रुते।
श्च नयागध्वंसो व्यापारः लोकव्युत्पत्तिवलात् क्रियायामेव कृतिसाध्येष्टसाधनत्वं लिङा वोध्यते इति लिंगत्वेनरूपेण विध्य
र्थत्वं आख्यातत्वेन प्रयत्नार्थत्वम् पचति पाकं करोतीति विवरणदर्शनात् किंकरोतीति प्रश्ने पचतीत्युत्तरादाख्यातस्य प्रय
त्नार्थकत्वनिश्चयात् रथो गच्छतीत्यादौ अनुकूलव्यापारे लक्षणा देवदत्तेन पच्यते तंडुलः देवदत्तः पचति तंडुलमित्यादौ
तात्पर्यग्राहकत्वम्। =६ कर्तृकर्मणोर्नाख्यातार्थत्वं किंतु तद्गतैकत्वादीनामेव तयोराक्षेपादेव लाभः प्रजयतीत्यादौ धातोरेव प्रकर्षे शक्तिः
उपसर्गाणां द्योतकत्वमेव न तत्र शक्तिरस्ति पदार्थज्ञानस्य परमप्रयोजनं मोक्षः तथाहि आत्मावारेद्रष्टव्यः श्रोत
व्योमंतव्यो निदध्यासितव्यः इति श्रुत्या श्रवणादीनां साक्षात्कारहेतुत्ववोधनात् श्रुत्या देहादिविलक्षणात्म
मननं चात्मन इतरभिन्नत्वेनानुमानं =८ ज्ञाने सत्यपि असंभावनानिवृत्तेः युक्त्यनुसंधानमननसाध्यत्वात् मननोपयोगि पदार्थनिरूपण द्वारा शा
स्त्रस्यापि मोक्षोपयोगः तदनंतरं श्रुत्योपदिष्टयोगविधिना निदिध्यासने कृते तदनंतरं देहादिविलक्षणात्मसाक्षात्का
रेसति देहादौ अहमभिमानरूप मिथ्याज्ञाननाशे सति दोषाभावात् प्रवृत्त्यभावे धर्माधर्मयोरभावात् जन्माभावे पूर्व
धर्माधर्मयोरनुभवेन नाशेचोक्त दुःखध्वंसलक्षणो मोक्षो जायते ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्ते र्ज्ञानमा
त्रसाध्यत्वात् तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति साधनान्तरनिषेधाच्च ननुतस्याद्विहेतु
विज्ञानं कर्म चोक्तं महामुने इति कर्मणोऽपि साधनत्वस्मरणात् ज्ञानकर्मणोः समुच्चय इति चेन्न नित्यनैमित्तकैरेव
कुर्वाणो दुरितक्षयं ज्ञानं च विमलीकुर्वन्न भ्यासेन च पाचयेत् अभ्यासात्पक्व विज्ञान कैवल्यं लभते नरः इत्यादिनाक
र्मणो ज्ञानसाधनत्वप्रतिपादनात् ज्ञानद्वारैव कर्म मोक्षसाधनं न साक्षात् ॥ तस्मात्पदार्थज्ञानस्य मोक्षः परम
प्रयोजनमित्येव प्रमाणीयमिति स्वनाम ग्रंथनाम च मुखतोऽभिदधानो ग्रंथमुपसंहरति कृतेति ॥ इति श्री
मदन्नंभट्टोपाध्यायविरचिता तर्कसंग्रहटीका समाप्ता ॥ ॥ शुभम् भूयात् ॥ ॥ ॥ ॥ श्रीरामः ॥

पाकानुकूलकृतिमानयं शाब्दवोधः ॥ = अत्रगमनानुकूलव्यापारवान्रथ इति शाब्दवोधः । = अत्र देवदत्तवृत्तिकृतिजन्यपाकजन्यफलशाली
तण्डुल इति शाब्दवोधः ॥ = पचति तण्डुलमित्यत्र तण्डुलनिष्ठविक्लित्त्यनुकूल देवदत्तकर्तृकः पाक इति वोध इत्यादि ॥ =

ऊ =२

यु = +
ज्ञाने कृतिकाख्यातस्य आश्रयेलक्षणा घटं जानातीत्यत्र घटविषयकज्ञानाश्रयो देवदत्तः एवं घटमिकृतीत्यगाधि। प्रयत्नार्थत्वनिश्चयादित्यस्यपर्यायः =४

धायकत्वेनानुभि

१५ सामानाधिकरण्याभावतया व्याप्यत्वासिद्धस्य विशिष्टव्याप्यत्वाभावतयासाधारणानुपसंहारिणो र्व्याप्तिसंशायाः ॥
15 हरिः ॐ नमः नमः शिवाय ॥ सं॰ १९३३ श्रावणस्य शुभे मासे दशम्यां रविवासरे शालिग्रामे णलिखि
तारीकातर्कस्य दीपिका ॥ १ ॥ छ ॥ श्रीरामाय नमः ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

प्रकृतशास्त्रविषयजिज्ञासुत्वे सति ग्रहणधारणापटुत्वं कोमलत्वम् ॥ तेन स्तनंधयकर्त्रादौ नातिव्या
प्तिः ॥ अन्वयव्यतिरेकसहचारित्वं कारणत्वं ॥ छ ॥

व्याप्तेः =

विघ्नबाहुल्ये विघ्नान्यूनसत्ताकमङ्गलसत्त्वे समाप्तिसत्त्वम् विघ्नान्यूनसत्ताकमंगलाभावे समाप्त्यभाव इति ॥
फलसाधनांशे भ्रांतिरहितत्वं शिष्टत्वं परस्परात्यंताभावासमानाधिकरणत्वं समनियतत्वम् ॥

व्याप्तिवैकल्यजननीपक्षताप्राणघातिनी हेत्वाभासाद्बुद्धिनाशो विधि र्वादो विचारहृत् ॥ १ ॥

तिप्रतिबंधकत्वे

तंडुलं पचतीत्यत्र तिप्प्रत्ययत्वेन साधुत्वं पत्वेन कर्त्तारं आख्यातत्वेन यत्नं तिप्त्वेन
संख्यां लट्त्वेन वर्त्तमानं बोधयति ॥ न्यायासंज्ञासासाफलत्वेति इति वचनात् ॥
तंडुलाभिन्नैककर्मकवर्त्तमानकालिकपाकानुकूलव्यापारानुकूलकृतिमान् इति शाब्दबोधः ॥
॥ देवदत्तः पचति तंडुलं ॥ =

शि॰ वः
१५